# SAKTIVADA

(Under the Project of Content Generation with a view to develop
E - Databank, E - Learning and E - Sources of Sanskrit Text.)


**Chief Director**

**Prof. PARAMESHWARA NARAYANA SHASTRY**
Vice Chancellor

Director

**Prof. Ch. L. N. SARMA**
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Co-ordinator

**Dr. R.G.MURALI KRISHNA**

(RSKS, New Delhi)

Co-ordinator

**Dr. R. BALAMURUGAN**
Head, Department of Navya Nyaya, Guruvayoor Campus

Asst.  Co-ordinators

**Dr. N. R. SREEDHARAN**
**Dr. O. R. VIJAYARAGHAVAN**



**RASHTRIYA SANSKRIT SANSTHAN**

**(DEEMED UNIVERSITY)**

**Guruvayoor Campus, Puranattukara**

# शक्तिवादः।

**भारतसर्वकारस्य योजना (Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)**


**प्रधाननिर्देशकः**

**आचार्य परमेश्वरनारायणशास्त्री**

**कुलपतिः**

**निदेशकः**

**आचार्य चल्ला.लक्ष्मीनारायणशर्मा**

**प्राचार्यः, गुरुवायूर् परिसरः**

**राष्ट्रियसंयोजकः**

**डा. रा.गायत्रीमुरलीकृष्णः**

**परियोजनाधिकारी**

**राष्ट्रिय संस्कृत संस्थानम्, नवदेहली**

**प्रधानसंयोजकः**

**डा. आर्. बालमुरुगन्**

**परिसरनव्यन्यायविभागाध्यक्षः, गुरुवायूर् परिसरः**

**उपसंयोजकौ**

**डा. एन्.आर्.श्रीधरन्**

**डा. ओ. आर्. विजयराघवन्**



**राष्ट्रिय संस्कृत संस्थानम्, (मानित विश्वविद्यालयः)**

**गुरुवायूर् परिसरः पुरनाट्टुकरा।**

**श्रीगदाधरभट्टाचार्यप्रणीत:**

**शक्तिवाद:।**

# सामान्यकाण्ड:।

**सङ्केतो लक्षणा चार्थे पदवृत्ति:।**

वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते। **"इदम्पदमिममर्थं बोधयत्विति", "अस्माच्छब्दादयमर्थो बोद्धव्य"** इति वेच्छा सङ्केतरूपा वृत्ति:।

तत्राधुनिकसङ्केत: परिभाषा। तया चार्थबोधकं पदं पारिभाषिकम्, यथा शास्त्रकारादि-सङ्केतितनदीवृद्ध्यादिपदम्।

ईश्वरसङ्केत: शक्ति:। तया चार्थबोधकं पदं वाचकम्, यथा गोत्वादिविशिष्टबोधकं गवादिपम्। तद्बोध्योऽर्थो गवादिर्वाच्य:। स एव मुख्यार्थ इत्युच्यते।

वाच्यवाचकादिपदे ईश्वरेच्छाया बोधजनकत्वेन या विषयता सैव धात्वर्थ:। तस्या आश्रयत्वरूपं कर्तृत्वं पदे कर्तृप्रत्ययेन बोध्यते। पदं गां वक्ति, गां ब्रूते, गोर्वाचकमित्यादौ कर्मप्रत्ययान्तेनार्थवाचकपदेन तत्तदर्थविषयकत्वरूपतत्तत्कर्मकत्वं धात्वर्थैकदेशे बोधे बोध्यते। पदेन गौरुच्यते, पदस्य गौर्वाच्य इत्यादौ पदनिष्ठधात्वर्थीभूततादृशविषयताया: परम्परया निरूपकत्वम्। तच्च धात्वर्थीभूततादृशविषयतानिरूपकबोधजनकत्वप्रकारताऽन्त:पातिबोधनिष्ठ-विषयतानिरूपकविषयितासम्बन्धावच्छिन्नप्रकारताश्रयत्वरूपं तादृशक्रियाकर्मत्वं गवादौ कर्मप्रत्य-येन बोध्यते।

द्वितीयेच्छाया: सङ्केतरूपत्वे वैपरीत्यमूह्यमिति **न्यायसिद्धान्त:।**

**अत्र मीमांसकानुयायिन:** - अपभ्रंशादपि शक्तिभ्रमेणार्थप्रत्ययात् सन्मात्रविषयके भगवत्सङ्केते तस्यापि बोधकत्वेन विषयत्वमिति नैयायिकैरभ्युपगमात्तस्यापि वाचकत्वं साधुत्वञ्च स्यात्।

एवं लाक्षणिकगङ्गादिपदस्योक्तयुक्त्या तीरादिवाचकत्वापत्ति:।

**यत्तु** - तादृशेच्छया भगवदुच्चरितत्वं वाचकत्वम्। अपभ्रंशादयश्च नार्थप्रत्यायनेच्छया भगवदुच्चरिता इति नातिप्रसङ्ग **इति। तन्न।** अस्मदाद्युच्चरितपदेष्वव्याप्ते:। तज्जातीयत्वनि-

वेशेऽपि वेदस्थलाक्षणिकेष्वतिव्याप्ते:। सादिदेवदत्तादिपदेऽव्याप्तेश्च। द्वादशेऽन्हि पिता नाम कुर्यादिति वेदे नामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्त इत्यादिस्वरूपाणां भगवदनुच्चरित-त्वात्।

एवमीश्वरसङ्केतस्य शक्तित्वे ईश्वरानङ्गीकर्तृमते शब्दबोधानुपपत्ति:।

अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयमेव। एवञ्चाधुनिकसङ्केतज्ञानादपि शाब्द-बोधस्तादृशसङ्केतस्य वृत्तित्वञ्च निर्वहति।

नचाधुनिकसङ्केतस्य वृत्तित्वे तात्पर्यस्यापि तथात्वप्रसङ्ग:। तस्यापि बोधकत्वेन पदविषयकतया सङ्केतरूपत्वात्। न चेष्टापत्ति:। तथा सति लक्षणास्थलेऽपि तात्पर्यस्य वृत्तितया लक्षणाया वृत्तित्वोच्छेदप्रसङ्गादिति वाच्यम्।

यत: पदार्थोपस्थितिव्यापारक: सङ्केतो वृत्ति:। तात्पर्यज्ञानञ्च साक्षादेव शाब्दबोधोपयोगि, न तु पदार्थोपस्थितिद्वारा; वृत्त्युपस्थापितपदार्थ एव प्रकरणादिना वक्तृतात्पर्यावधारणात्। तथा च लक्षणाया वृत्तित्वानभ्युपगमे गङ्गादिपदात्तीराद्यनुपस्थितौ तत्र तत्पदव्यक्तेस्तात्पर्याग्रहा-च्छाब्दबोधानुपपत्तिरिति तस्या वृत्तित्वमावश्यकम्।

न च तात्पर्यग्रहार्थं लक्षणाऽधीनोपस्थितेरपेक्षितत्वेऽपि तदधीनोपस्थितित्वेन शाब्दबोधहे-तुत्वे मानाभावात् तस्या वृत्तित्वासिद्धि:। लक्षणास्थले तात्पर्यात्मकसङ्केताधीनोपस्थितित एव शाब्दबोधनिर्वाहादाधुनिकसङ्केतस्थले तात्पर्याधीनोपस्थिते: शाब्दबोधप्रयोजकताया: क्लृप्तत्वा-दिति वाच्यम्।

लक्षणाऽधीनपदार्थोपस्थितिसत्त्वे मुख्यार्थबाधादिना तत्तदर्थे तत्तत्पदव्यक्तेस्तात्पर्यग्रहे उपस्थित्यन्तरमन्तरेणैव तत्तदर्थानुभवस्य सर्वानुभवसिद्धत्वात्। आधुनिकसङ्केतस्थले पूर्वसङ्के-तकर्तृपुरुषवाक्यतोऽर्थविशेषे डित्थादिपदस्य सङ्केतग्रहात् तत्तत्पदेनार्थविशेषोपस्थितौ प्रकरणा-दिना तत्तत्पदव्यक्तेस्तत्र तात्पर्यग्रहे सति शाब्दबोधस्य वृत्त्यन्तराधीनोपस्थितिमन्तरेणैवो-त्पत्त्या आधुनिकसङ्केतस्य वृत्तित्वमिति चेत्,

एवमपि सङ्केतस्य सम्बन्धत्वे मानाभावेन निष्प्रतियोगिकतया तदसम्भवेन च पदार्थो-पस्थापकत्वासम्भवेन वृत्तित्वानिर्वाहात्।

**एतेन** शाब्दबोधौपयिकसम्बन्धत्वेनेश्वरसङ्केतज्ञानं हेतु:। तच्च मीमांसकानामपि सम्भवति। तादृशज्ञानविरोधिविपरीतज्ञानाभावादित्यपि **निरस्तम्।**

**यत्तु**-स्वजन्यज्ञानविषयत्वप्रकारकेच्छाविशेष्यत्वमर्थे पदसम्बन्ध:। पदे चार्थस्य विपरीत:। अस्य सम्बन्धत्वमन्यथाऽनुपपत्त्या कल्प्यते। एतादृशपरम्पराया अपभ्रंशादिस्थले सम्बन्धत्वं न स्वीक्रियत इति तत्र तत्सम्बन्धावगाहिज्ञानं भ्रम एवेति।

**तदपि तुच्छम्।** अक्लृप्तस्य तादृशेच्छाविषयत्वस्य सम्बन्धतोपगमे तादृशज्ञानविषयत्वस्व-समानकालीनविषयत्वादिपरम्पराया अपि विनिगमनाविरहेण सम्बन्धताप्रसङ्गात्। तस्मात् पदपदार्थयो: सम्बन्धान्तरमेव वाच्यवाचकभाव इति **वदन्ति।**

**यस्तु** - ज्ञाने पदानां शक्ति:, न त्वर्थे। तथा च तज्ज्ञानशक्तत्वं तद्वाचकत्वम्। तच्च तद्विषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्वम्। स च धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव। लाक्षणिकं च नानुभावकमेवेति न तत्र शक्ति:। घटादिपदस्य मितिमातृविषय-कधीजनकत्वेऽपि न तद्वाचकत्वम्। तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव तद्वाचकत्वात्। मितिमातृविषयकत्वेन च ज्ञानस्य न किञ्चित्पदशक्यता। ज्ञानसामान्यसामग्र्या एव मितिमातृभासकतया पदान्तरस्य च तदर्थभासकतया तद्विषयकत्वस्य तत्पदजन्यतावच्छेदकत्वे मानाभावात्।

कार्यान्वितस्वार्थे पदानां शक्तिरिति वादिनां **गुरूणां** साक्षात्परम्परासाधारण-कार्यत्वविषयतानिरूपितत्वेन घटादिविषयताया घटादिपदजन्यतावच्छेदकत्वेऽपि न घटादिपदस्य कार्यतावाचकत्वम्। अपि तु लिङादिपदस्यैव। तद्विषयकत्वावच्छिन्नेत्यत्र साक्षात्परम्परासाधारण-निरूपितत्वांशेऽविशेषणतयाऽवच्छेदकत्वस्यैव निवेशात्।

नच कार्यानुकूलशक्ते: स्वरूपसत्या एव कार्यानुकूलतया पदार्थोपस्थितौ शाब्दबोधे च ज्ञातोपयोगिनोऽर्थे पदस्य वृत्तिरूपशक्त्यन्तरस्य स्वीकार आवश्यक इति वाच्यम्।

दाहादिकार्ये वह्न्यादिनिष्ठशक्ते: स्वरूपसत्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्ते: शाब्दबोधे पदार्थोपस्थितौ च ज्ञातोपयोगित्वोपगमे बाधकाभावात्। अतीतानागतपदज्ञानादपि

शाब्दबोधोत्पत्त्या पदानामहेतुत्वेन तत्र हेतुतावच्छेदकशक्त्यसम्भव इति तु न शङ्क्यम्। तन्मते पदानां नित्यत्वात्।

अस्तु वा तज्ज्ञानशक्त्या तस्य वाचकत्वमिति **मीमांसकमतविशेष:।**

नचासौ **विचारसह:** - यतस्तन्मते लाक्षणिकस्याननुभावकत्वं दुर्घटम्। पदार्थोपस्थितिद्वारा शक्यार्थानुभवे शक्तस्येव लक्ष्यार्थबोधे लाक्षणिकस्यापि हेतुताया दुर्वारत्वात् तत्रापि शक्तेरावश्यकतया वाचकताऽऽपत्ते:। पदार्थोपस्थित्याऽन्यथासिद्धत्वे शक्तस्यापि तथात्वापातात्।

नचानुभावकतावच्छेदकशक्त्यभावात् लाक्षणिकस्य नानुभावकत्वसम्भव:। तर्हि वाक्यार्थघट-कार्थान्तरवाचकमेव पदं स्वार्थस्येव तदन्वयप्रतियोगिलक्ष्यार्थस्याप्यनुभावकमुपेयत इति वाच्यम्।

एवं सति गङ्गायां घोष इत्यादौ घोषादिपदस्यपि गङ्गातीरादिरूपार्थानुभावकतावच्छेदक-शक्तिमत्त्वेन तद्वाचकत्वापत्ते:। लाक्षणिकस्याननुभावकत्वे शक्तपदाघटितधूमादित्यादिहेतु-वाक्यादन्वयानुपपत्तेश्च। तत्र धूमादिपदस्य ज्ञाने विभक्तेश्च ज्ञाप्यत्वे लाक्षणिकत्वात्।

अथ लक्ष्यार्थस्य न शाब्दबोधे प्रवेश:। अपि तु स्मृतस्य तस्य समभिव्याहतपदार्थैरसंसर्गा-ग्रहमात्रम्। तथा च नानुपपत्ति:।

नच लक्ष्यार्थस्य शाब्दबोधविषयत्वानुपगमे तदुपरागेण शृणोमीत्यनुव्यवसायानुपपत्तिरिति वाच्यम्।

इष्टत्वात्। विधेयोपरागेणैव तथा प्रत्ययात्। लक्ष्यार्थस्य शाब्दबोधविषयत्वेऽपि तस्य विधेयतया भानानभ्युपगमात्। **"विधौ न पर: शब्दार्थ"** इति सिद्धान्तादिति चेत्,

न। मञ्चा: क्रोशन्तीत्यादौ लक्ष्यार्थमञ्चस्थपुरुषादे: शाब्दबोधविषयताया आवश्यकत्वात्। अन्यथा पूर्वाननुभूतस्य पुरुषादे: प्रतीत्यनिर्वाहात्। अननुभूतस्य स्मरणासम्भवात्। समानप्रकार-कत्वमात्रेण शाब्दबोधपदार्थोपस्थित्यादे: कार्यकारणभावमभ्युपगच्छतां मीमांसकानां शाब्दबोधे योग्यताबलादपूर्वपदार्थस्य भानेन लक्ष्यार्थस्य शाब्दानुपगमेऽपूर्वस्यापि तस्य प्रतीत्युपपत्तिरिति तद्विषयक-शाब्दत्वावाच्छिन्नं प्रति शक्तिविशेषपुरस्कारेण तद्वाचकपदस्य तज्ज्ञानस्य वा न

हेतुतासम्भवः। विशिष्य तत्तत्पदार्थान्विततत्तदर्थबोधे तत्तत्पदसाकाङ्क्षतत्तत्पदज्ञानत्वेनावश्य-क्लृप्तकारणतयैवोपपत्तावीदृशकार्यकारणभावस्य निर्युक्तिकत्वात्।

**इदन्तु तत्त्वम्** - तीरादौ गङ्गादिपदजन्यबोधविषयत्वसत्त्वेऽपि तदंशे शुद्धबोधविषयत्वत्वा-दिनैव तादृशविषयत्वादिप्रकारकत्वमीश्वरेच्छायामुपगम्यते। न तु गङ्गादिपदजन्यबोधविषयत्व-त्वादिनाऽपि तत्प्रकारकत्वम्, मानाभावात्। तदनभ्युपगमेऽपि तस्याः सर्वविषयकत्वव्याघाता-भावात्।

न च तथा सति बोधांशे गङ्गापदजन्यत्वानवगाहितया सर्वविषयकत्वानुपपत्तिरिति वाच्यम्। तीरादिनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकघटकतया तदनवगाहित्वेऽपि बोधांशे स्वातन्त्र्येण तदवगाहित्वोपगमात्। तथा च तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित-विशेष्यतासम्बन्धेनेश्वरेच्छावत्त्वस्येश्वरेच्छानिरूपिततादृशविशेष्यतावत्त्वस्य वा तत्पदशक्यता-रूपतया नातिप्रसङ्गः। उक्तरीत्यैव च घटादिपदजन्यबोधविषयस्य घटान्वितकर्मत्वान्वितानयना-देर्घटादिसंसर्गस्य च तादृशबोधविषयत्वप्रकारकेश्वरेच्छाविषयत्वेऽपि घटादिपदावाच्यत्वमुपपादनी-यम्।

**अन्विताभिधानवादिनस्तु** - पदार्थसंसर्गस्यापि वाच्यतां **स्वीकुर्वन्ति।** तन्मते इतरान्वितघटो घटपदशक्य इत्येतादृशमेव शक्तिज्ञानं शाब्दबोधप्रयोजकम्। घटो घटपदवाच्य इत्याकारकस्यान्व-यांशानन्तर्भावेण शक्तिग्रहस्य तथात्वे च वृत्तिग्रहाविषयतया पदार्थसंसर्गस्य शाब्दबोधविषयता-नुपपत्तेः।

नचेतरान्वितघटस्य वाक्यप्रतिपाद्यतया शाब्दबोधात् प्राक् शक्तिग्रह एव दुर्घटोऽनुपस्थित-त्वादिति वाच्यम्।

विशेषतः पदार्थान्तरघटितस्य तदन्वितघटादिरूपवाक्यार्थस्य प्रागनुपस्थितावपीतरपदार्थत्वा-दिना सामान्यधर्मप्रकारेण तद्धटितस्य तदन्वितघटादेः प्रागुपस्थितिसम्भवेन तत्र शक्तिग्रहस्य सुघटत्वात्।

वस्तुतस्तु - पदार्थान्तरमनन्तर्भाव्य केवलान्वयांशान्तर्भावेण शक्तिग्रहस्य शाब्दधीप्रयोजकतोपेयते। पदार्थान्तरस्य पदान्तरलभ्यतया तदंशान्तर्भावेण शक्तिग्रहस्यानुपयुक्तत्वात्।

नचान्वयस्य पदवाच्यत्वे तदंशे शक्तिग्रहस्य शाब्दबोधोपयोगित्वे च मानाभाव इति वाच्यम् ।

तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानादन्वयानुपस्थितौ तस्य शाब्दबोधविषयत्वासम्भवात्, अन्वयांशे शक्तिग्रहस्य शाब्द-बोधेऽवश्यापेक्षणीयत्वात्। संसर्गताभिन्नविषयतायास्तादृशोपस्थितिजन्यतावच्छेदकत्वे गौरवात्।

**अत्र वदन्ति** - सामान्यतस्तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेन न हेतुता। स्वतन्त्रवृत्तिज्ञानाद् विशृङ्खलभावेनैकपदोपस्थितयोः पदार्थतत्त्वावच्छेदकयोर्विशेष्यविशेषणभाव-क्रमेण शाब्दबोधापत्तेः। किन्तु तद्धर्मप्रकारेण तद्विषयक-शाब्दबोधे वृत्तिज्ञानजन्यतद्धर्माव-च्छिन्नतद्विषयकोपस्थितित्वेनैव हेतुता वाच्या।

एवञ्च तत्संसर्गकबोधस्य किञ्चिद्धर्मप्रकारेण तद्विषयकत्वाभावात् वृत्तिज्ञानात्तदनुपस्थि-तावपि तत्संसर्गकशाब्दबोधः सम्भवत्येव।

## क्रोडपत्रम्।

**एवं** तद्विषयकशाब्दबोधे तच्छक्तपदज्ञानजन्यतदुपस्थितितल्लाक्षणिकपदज्ञानजन्यतदुप-स्थित्योर्द्वयोरेव हेतुतया तयोः परस्परजन्यबोधे व्यभिचारस्य वारणाय तत्तत्कारणानन्तर्यस्य तत्तत्कारणजन्यताऽवच्छेदकप्रवेशध्रौव्येण पदार्थद्वयसंसर्गावगाहिबोधे वृत्तिज्ञानजन्यतदुपस्थिते-र्व्यभिचाराप्रसक्त्याऽन्वयस्य पदवाच्यत्वमप्रामाणिकम्।

नच शक्तिलक्षणयोर्वृत्तित्वेनानुगमसम्भवात् तदुभयविषयकज्ञानजन्योपस्थित्योरेकरूपेणैव हेतुतया नोक्तव्यभिचारप्रसक्तिरिति वाच्यम्। उभयसाधारणवृत्तित्वस्यानुगतस्य दुर्वचत्वात् ।

**यत्तु** - शक्तिविषयकज्ञानजन्यतदुपस्थितित्वेनैव शक्तिलक्षणाऽधीनपदार्थोपस्थित्योरनुगम-सम्भवः; घटशक्तं घटपदमित्येतादृशशक्तिज्ञानजन्योपस्थितेरिव घटसम्बन्धिशक्तं पटपदमित्या-

दिलक्षणाज्ञानजन्योपस्थितेरपि घटादिसम्बन्धिपटादिनिरूपितशक्तिविषयकज्ञानजन्यत्वादिति नोक्तव्यभिचारप्रसक्तिः।

नच घटशक्तं घटपदमित्यादिज्ञानजन्यघटाद्युपस्थितौ यत्रोद्बोधकान्तरात् पटादिभानं तादृशपटादिविषयकोपस्थितेरपि पटादिशाब्दबोधजनकत्वापत्तिरिति तद्विषयकशाब्दबोधे तदर्थ-विशेषितशक्तिविशिष्टपदविषयकज्ञानजन्यतदुपस्थितित्वेन हेतुता वाच्या। तथा च न तेन रूपेण घटसम्बन्धिशक्तं पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितेः संग्रह इत्युक्तव्यभिचार एवेति वाच्यम्।

शक्तिविषयत्वावच्छिन्नकारणताप्रतियोगिकतद्विषयत्वावच्छिन्नकार्यताशालित्वेनोपस्थितेस्तच्छाब्दबोधहेतुतया दर्शितोद्बोधकान्तरप्रयोज्यपटादिविषयताकोपस्थितेर्निरुक्तकार्यताशालित्व-विरहेणोक्तातिप्रसङ्गानवकाशात्। तदर्थविशेषितशक्तिविषयतापर्यन्तस्योपस्थितिनिष्ठकारणता-वच्छेदकेऽनिवेशादनुगमसम्भवादुक्तलक्षणाज्ञानहेतुतायामपि शक्तिविषयताया अवच्छेदकत्वेन प्रवेशादिति।

**तन्न समीचीनम्** - उक्तानुगतरूपेण पदार्थोपस्थितेर्हेतुत्वे घटकालीना या शक्तिस्तद्वत् पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितितोऽपि घटादिशाब्दबोधप्रसङ्गात्। तत्कालीनशक्तिरूपपर-म्परासम्बन्धविषयताऽन्तःपातिन्याः शक्तिविषयताया अपि तादृशसम्बन्धविषयताप्रयोज्यघटादि-विषयताप्रयोजकत्वात्। तादृशशक्तिविषयकधियश्च घटादिनिरूपितत्वेन तत्सम्बन्धिनिरूपितत्वो-परागेण च पदे शक्त्यनवगाहितया शाब्दबोधप्रयोजकतच्छक्तपदज्ञानतल्लाक्षणिकपदज्ञाना-नात्मकतया तज्जन्योपस्थितेः शाब्दबोधजनकत्वोपगमासम्भवात्।

नच यत्किञ्चिन्निरूपितत्वोपरक्तशक्तिविषयताप्रयोज्यतत्तदर्थविषयताकोपस्थितित्वेन शाब्दधीजनकत्वोपगमान्नायमतिप्रसङ्गः। उक्तज्ञानीयशक्तिविषयतायाः किञ्चिन्निरूपितत्व-विषयतानिरूपितत्वविरहादिति वाच्यम्।

एवमपि घटकालीना या पटनिरूपिता शक्तिस्तद्वत्पटपदमिति ज्ञानप्रयोज्यघटाद्युप-स्थितेरव्यावृत्तेः।

अथ किञ्चिन्निरूपितत्वविषयतानिरूपितत्वेन शक्तिविषयता यादृशकारणतावच्छेदिका तादृशकारणताप्रतियोगिकप्रकृतार्थविषयत्वावच्छिन्नकार्यताशालित्वेन पदार्थोपस्थितेर्हेतुत्वोपगमान्नायमतिप्रसङ्ग:। शक्त्यंशे उदासीनस्य पटनिरूपितत्वादेर्भानेऽपि घटकालीनशक्तिरूपघटीय-परम्परासम्बन्धविषयकपदज्ञानस्य घटादिस्मारकतया तत्स्मृतिजनकतावच्छेदककोटौ पटादि-निरूपितत्वविषयतानिरूपितत्वस्य शक्तिविषयकत्वेऽनिवेशादिति चेत्।

एवमपि यत्र ज्ञाने घटादे: शक्तत्वसम्बन्धेन पदांशे प्रकारता तज्जन्योपस्थितितोऽपि घटादे: शाब्दबोधोत्पत्त्या तदनुपपत्तिर्दुर्वारैव। तत्र पदांशेऽर्थसंसर्गतया भासमानशक्तावर्थस्य निरूपितत्वरूपसम्बन्धान्तराभानात्।

वस्तुतो घटत्वाद्युपलक्षितवाचकात् द्रव्यादिपदाच्छक्त्याऽभ्रान्तस्य घटत्वादिप्रकारकशाब्द-बोधवारणाय तद्धर्मप्रकारकशाब्दबोधे शक्तौ तद्धर्मविशिष्टनिरूपितत्वावगाहित्वेन शक्तिज्ञानस्यो-पयोगिता वाच्या। तथाच तत्सम्बन्धिशक्तत्वावगाहिनो लक्षणाग्रहस्य तेन रूपेणासंग्रहादननुगमेन व्याभिचारप्रसक्त्योक्तकार्यकारणभावे कारणानन्तर्यस्य प्रवेश आवश्यक:।

एवं शक्तिज्ञानमुभयविधं विनिगमकाभावात् शाब्दबोधप्रयोजकम्, पदेऽर्थवाचकत्वावगाहि, अर्थे पदवाच्यत्वावगाहि च। तयोरपि नानुगमसम्भव:। वाच्यत्ववाचकत्वयो: शक्तिप्रतियोगित्व-शक्त्याश्रयत्वरूपमिथोविलक्षणसम्बन्धरूपतयाऽनुगतानतिरिक्तरूपाभावात्। सम्बन्धत्वादिनाऽनुगमे तदीयकालिकादिसम्बन्धज्ञानादर्थधर्मिकपदवाचकताया: पदधर्मिकार्थवाच्यतायाश्च ज्ञानात् शाब्द-बोधापत्ते: तज्जन्योपस्थित्योरपि परस्परजन्यबोधे व्यभिचार:।

एवं लक्षणाज्ञानमपि पदेऽर्थसम्बन्धिवाचकतावगाहितया अर्थे पदवाच्यसम्बन्धितावगाहितया च द्विविधं शाब्दबोधप्रयोजकम्। तदधीनोपस्थित्योरप्यनतिप्रसक्तरूपेणानुगमासम्भवात् परस्पर-जन्यबोधे व्यभिचार इति कार्यतावच्छेदकगर्भे तत्तत्कारणानन्तर्यप्रवेशो ध्रुव इत्यवधेयम्।

**क्रोडपत्रं समाप्तम् ।**

(वस्तुतस्तु शक्त्या लक्षणया चोपस्थितस्य तत्तदर्थस्य शाब्दबोधे भानादुभयविधतत्तदर्थो-पस्थितेरेव तत्तद्विषयकशाब्दबोधहेतुता वाच्या। तादृशोपस्थित्योश्चानुगतानतिप्रसक्तकारणता-

च्छेदकस्यागुरोर्दुर्वचतया व्यभिचारवारणाय शक्त्यादिज्ञानजन्यतदुपस्थितेर्जन्यतावच्छेदककोटौ तत्तत्कारणाव्यवहितोत्तरत्वनिवेश आवश्यक:।

इत्थञ्च वृत्त्यनुपस्थितस्यापि संसर्गस्य शाब्दबोधोपगमे व्यभिचाराप्रसक्त्या न किञ्चि-द्बाधकमिति किं तत्र वृत्तिकल्पनेन।)

अथ तत्र वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दबोधविषयत्वोपगमे सम्बन्धभाने नियामकाभावात् सर्वत्राबाधितयावत्संसर्गभानापत्तिरिति चेत्।

न - कयोश्चित् पदयो: केनचित् सम्बन्धेन स्वार्थान्वयबोधसाकाङ्क्षतया आकाङ्क्षाज्ञानस्यैव पदार्थसंसर्गभाननियामकत्वात्। ययो: पदयोर्नानासम्बन्धेन स्वार्थान्वयबोधे आकाङ्क्षा तज्जन्यशाब्दबोधे संसर्गविशेषतात्पर्यज्ञानरूपकारणबलादेव सम्बन्धभाननियमोपपत्ते:। अन्वयांशे शक्त्युपगमेऽप्येकैकस्यैव पदार्थस्य संसर्गविधया क्वचित् कस्यचित् भानं क्वचित् कस्यचिदभानमित्यनियमेन सामान्यरूपेणैवान्वयस्य शक्यकोटावन्तभार्वणीयतयोक्तस्यैव संसर्ग-भाननियामकत्वात्।

नच संसर्गविशेषानुपस्थितौ तात्पर्यज्ञानासम्भवेन तदुपस्थितेरावश्यकतया तद्गोचर-संस्कारोद्बोधार्थमेव तत्र वृत्तिज्ञानमपेक्षितमिति वाच्यम्।

उद्बोधकान्तरोपस्थितेऽपि संसर्गे तात्पर्यग्रहसम्भवात् तत्र वृत्तिग्रहस्यानपेक्षितत्वात्। तस्मात् घटत्वगोत्वादिविशिष्टे घटगवादिपदस्य शक्ति:। पदार्थद्वयसंसर्गस्त्वाकाङ्क्षादिबललभ्य एवेति स्थितम्।

घटादिपदस्य पदार्थतावच्छेदकीभूतघटत्वादिविशिष्टे एव शक्तिर्न तु तदुपलक्षिते। घटत्वादेरुपलक्षणत्वे तस्य द्रव्यत्वाद्यविशेषेण घटादिपदात् द्रव्यत्वादिना न बोध:। अपि तु घटत्वादिनैवेति नियमानुपपत्ते:।

अथ घटत्वादेरिव द्रव्यत्वादेरपि वैशिष्ट्यस्य घटादौ सत्त्वात् घटादिपदशक्तेर्घटत्वादि-सामानाधिकरण्यरूपवैशिष्ट्यवत् द्रव्यत्वादिसामानाधिकरण्यस्यापि तत्र सत्त्वात् घटत्वादिविशिष्टे शक्तिर्न तु द्रव्यत्वादिविशिष्ट इत्यस्य कोऽर्थ:।

**अत्र वदन्ति** - तद्विशिष्टे शक्तिरित्यस्य तद्धर्मतद्वैशिष्ट्यतदाश्रयेषु त्रिष्वेव शक्तिरित्यर्थ:। घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि द्रव्यत्वादौ तच्छक्तिविरहात् तेषामुपलक्षणता। घटत्वादौ तत्सत्त्वाच्च तेषां विशेषणता। एवञ्च प्रवृत्तिनिमित्तेऽपि शक्ते: सत्त्वात् तस्यापि वाच्यतया वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणदानं **"जात्याकृतिव्यक्तय: पदार्थ:"** इति न्यायसूत्रोक्तं गोत्वादिजातेर्गवा-दिपदार्थत्वं चोपपद्यते।

अथ घटशब्दात् घटो बोद्धव्य इत्याकारिकाया भगवदिच्छाया बोधविशेषविषयतात्वेन बोधविषयत्वप्रकारतानिरूपितविशेष्यता घट एव, न तु घटत्वादौ। विषयतामात्रञ्च वस्तुमात्र एवेति कथं घटपदशक्तिर्घटत्वादिषु त्रिष्वेवेति नियम इति चेत्,

ईश्वरेच्छायास्तत्पदजन्यशाब्दबोधविषयताप्रयोजकसम्बन्ध एव तत्र तत्पदशक्तिव्यपदेश-नियामक:। घटपदात् घटो बोध्य इत्येतादृशेच्छायाञ्च घटत्वावच्छेदेन बोधविषयत्वमवगाह-मानायां समवायावच्छिन्नं बोधविषयत्वावच्छेदकत्वं घटत्वे, समवायेन घटत्वावच्छेद्यत्वं वा विषयतायां संसर्गमर्यादया भासते।

एवञ्चाश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं घटस्य, अवच्छेद-कत्वसंसर्गावच्छिन्नघटविशेषणताऽऽपन्नबोधविषयत्वस्य या प्रकारता तन्नि-रूपितविशेष्यत्वं घटविशेषणताऽऽपन्नबोधविषयत्वांशेऽवच्छेद्यत्वसम्बन्धेन प्रकारत्वं वा घटत्वस्य, घटत्वे बोधविषयताया: संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं समवायस्येति त्रितयमेव घटपदजन्यबोधविषयतायां ज्ञातमुपयुज्यत इति त्रयाणां वाच्यतोपपत्ति:।

घटघटत्वसंसर्गेषु सङ्केतविषयतानां मिथो वैलक्षण्येऽपि तन्निरूपकबोधनिष्ठविषयताया ऐक्याच्छक्त्यैक्यप्रवाद:। न तु सङ्केतैक्यात्। शक्तशक्यत्वावच्छेदकभेदेनापि शक्तिभेदानुप-पत्ते:। भगवत्सङ्केतस्याभेदात्। तदंशे आश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपित-सङ्केतविषयतावगाहिज्ञानस्यैव पदार्थान्तरान्वयबोधोपयोगित्वमिति शक्तिभ्रमं विना न पदार्थ-तावच्छेदके पदार्थान्तरान्वय:।

**यत्तु** - तदंशे सङ्केतमुख्यविशेष्यताग्रहः तत्रेतरान्वयबोधप्रयोजकः। लोमादिमान् पशुपदा-द्बोद्धव्य इत्याकारकसङ्केते लोमाद्यंशे बोधविषयतायाः प्रकारत्वेऽपि लोमादेर्धर्मिविशेषणता-ऽऽपन्नस्यैव तादृशविषयताविशेष्यत्वम्; न तु मुख्यविशेष्यत्वमतो न लोमादौ पदार्थान्तरान्वय इति,

**तन्न** - लोम पशुपदजन्यबोधविषयतावच्छेदकं भवत्वित्याद्याधुनिकसङ्केतविषयकादवच्छे-दकतासंसर्गावच्छिन्नतादृशबोधविषयत्वप्रकारताकमुख्यविशेष्यं लोमेति ज्ञानाल्लोमादिमुख्यविशे-ष्यकशाब्दबोधानुदयेनाश्रयत्वसम्बन्धावच्छिन्नत्वेन तादृशबोधविषयत्वप्रकारतावगाहिताया अवश्यं निवेशनीयत्वात्। तत्र च लोमावच्छिन्नविषयकबोधस्यैव सङ्केतविषयतया ग्रहेणान्यादृशबोधो-त्पत्तेरनुभवविरुद्धतयेष्टापत्तेरयोगात् तादृशविशेष्यतायां मुख्यत्वनिवेशे प्रयोजनाभावात्।

एवञ्च पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेनेत्यत्र पदार्थत्वं बोधविषयताश्रयत्वेन सङ्केतविषयत्वम्। तदेकदेशत्वञ्च बोधविषयतावच्छेदकत्वेन तथात्वरूपम्। तदेव च शक्यता-वच्छेदकत्वमित्यवधेयम्।

अथ घटत्वाद्युपलक्षिते द्रव्यपदशक्त्यवगाहिप्रमातो घटत्वादिप्रकारकस्य, घटादिपदशक्ति-प्रमातः कालिकादिसम्बन्धेन घटत्वादिप्रकारकस्य च शाब्दबोधस्य वारणाय तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधं प्रति तत्सम्बन्धेन तद्धर्मविशिष्टांशे तत्पदवाच्यत्वावगाहिज्ञानं कारणं वाच्यम्।

विशिष्टांशे तत्पदवाच्यत्वावगाहित्वञ्च विशेषणीभूततद्धर्मतत्सम्बन्धतद्धर्म्यंशे तदवगाहित्व-रूपं वाच्यम्। न तु तेन सम्बन्धेन तद्धर्मं धर्मितावच्छेदकीकृत्य तदवगाहित्वमात्रम्।

घटत्वादिकं धर्मितावच्छेदकीकृत्य द्रव्यादिपदशक्तिज्ञानस्यापि कालिकादिसम्बन्धेन घटत्वा-दिकं धर्मितावच्छेदकीकृत्य घटादौ घटादिपदशक्तिग्रहस्यापि च प्रमात्वेनोक्तातिप्रसङ्गावारणात्। एवमपि घटत्वांशे निधर्मितावच्छेदककात् प्रमेयत्वादिधर्मितावच्छेदककाच्च घटादिपदनिरूपित-

वाच्यताग्रहात् तत्प्रकारकबोधवारणाय स्वरूपतो घटत्वादिप्रकारकबोधे घटत्वत्वावच्छिन्नधर्मिक-वाच्यत्वग्रहापेक्षोपेया। तथाच घटत्वत्वाद्यनुपस्थितिदशायां घटादिपदाच्छाब्दबोधानुपपत्तिः।

नच तदंशे घटादिवाचकताज्ञानमेव शाब्दबोधहेतुः। एवञ्च स्वरूपतो घटत्वादिप्रकारकबोधे वाचकत्वांशे स्वरूपतो घटत्वादिप्रकारकज्ञानस्यैव हेतुत्वमिति घटादिपदजन्यबोधे घटत्वत्वाद्यु-पस्थितेर्नापेक्षेति वाच्यम्।

एवमपि घटादिपदांशे समवायवाचकताप्रकारकज्ञानस्य शाब्दबोधे घटत्वादिसम्बन्धतया स्वरूपतः समवायभानप्रयोजकताया वाच्यतया समवायवाचकताज्ञाने वाचकतांशे समवायादेः स्वरूपतः प्रकारत्वासम्भवेन समवायत्वादिप्रकारेणैव तज्जानस्योपगन्तव्यतया तदनुपस्थिति-दशायां घटादिपदाच्छाब्दबोधानुपपत्तेः। तथा च केन रूपेण तत्र शक्तिधीहेतुता।

**अत्रोच्यते** - तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधे तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठावच्छेदक-ताकस्वजन्यबोधविषयत्वप्रकारतानिरूपितेच्छाविशेष्यतात्वावच्छिन्नसंसर्गकतत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठधर्मितावच्छेदकताकपदप्रकारकज्ञानत्वेन विषयताविशेषसंसर्गकार्थविशेष्यकशक्तिज्ञानस्य हेतुता।

ईदृशशक्तिग्रहे च सम्बन्धघटकतयैवावच्छिन्नत्वांशे समवायभानात्, स्वरूपतोऽपि तस्य तथा भानसम्भवेन समवायत्वोपस्थितेर्नापेक्षेति सामञ्जस्यम्।

द्रव्यपदात् द्रव्यं बोद्धव्यमित्याकारकताप्रयोजकद्रव्यपदजन्यबोधविषयत्वीयभगवदिच्छा-प्रकारता न घटत्वावच्छिन्नविषयत्वनिष्ठा। अपि तु द्रव्यत्वावच्छिन्नविषयत्वनिष्ठैवेति द्रव्यपदजन्यबोधीयघटत्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितभगवदिच्छाविशेष्यतात्वावच्छिन्न संसर्गेण घटत्वावच्छिन्नविशेष्यकद्रव्यपदप्रकारकज्ञानं संस-र्गतावच्छेदकघटकघटत्वावच्छिन्नत्वांशे भ्रमः।

नच द्रव्यपदजन्यविभक्त्युपस्थापितैकत्वादिप्रकारकद्रव्यत्वावच्छिन्नविशेष्यकबोधीया या एकत्वावच्छिन्नद्रव्यत्वावच्छिन्नविषयता साऽपि द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतात्वेन

भगवदिच्छाविषय:। एवञ्च द्रव्यपदजन्यबोधीयैकत्वावच्छिन्नविषयत्वप्रकारतानिरूपितभगवदिच्छाविशेष्यतासम्बन्धेनैकत्वादिमतो द्रव्यपदवत्त्वात् द्रव्यपदादभ्रान्तस्य पदान्तरानुपस्थितैकत्वप्रकारेणापि शाब्दबोधप्रसङ्गो दुर्वार एवेति वाच्यम्।

तादृशविशेष्यतात्वेन तस्य सम्बन्धत्वानुपगमात्।

अथवा तत्पदजन्यतद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वावच्छिन्नत्वेन स्वजन्यबोधविषयत्वप्रकारतावगाहितादृशप्रकारतानिरूपितविशेष्यतासंसर्गकपदप्रकारकं ज्ञानं हेतु:। एवञ्चैकत्वादिप्रकारकद्रव्यादिपदजन्यबोधजनकशक्तिग्रहेण द्रव्यादिपदजन्यबोधविषयत्वीयद्रव्यत्वाद्यवच्छिन्नत्वावच्छिन्नत्वविशिष्टभगवदिच्छाप्रकारतायां बाधितस्यैकत्वावच्छिन्नत्वावच्छिन्नत्वस्यावगाहनात् तस्य भ्रमत्वम्।

**यत्तु**-पदार्थांशे घटत्वादे: शाब्दबोधप्रकारतायां तदंशे तत्तत्पदशक्यतावच्छेदकत्व-मेव प्रयोजकम्। शक्यतावच्छेदकत्वञ्च तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेकत्वम्, न तु बोधविषयतावच्छेदकतया सङ्केतविषयत्वरूपं विशेषणविधया वाच्यत्वम्। तथाच तद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वविशिष्टतादृशविषयतासंसर्गकशक्तिज्ञानमेव कारणमास्ताम्।

द्रव्यादिपदजन्यबोधविषयत्वप्रकारतानिरूपितद्रव्यत्वावच्छिन्नभगवत्सङ्केतीयविशेष्यतात्वेनैव सम्बन्धता। न तु तादृशप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यतात्वेन। तादृशप्रकारतानिरूपितभगवदिच्छाविशेष्यतायां द्रव्यत्वादेरेवावच्छेदकत्वं, न तु घटत्वादेरित्येव वा स्वीकरणीयमिति नोक्तातिप्रसङ्ग:। किं प्रवृत्तिनिमित्तस्य वाच्यत्वोपगमेन, इति शक्यतावच्छेदकमवाच्यमेवेति **दीधितिकारमतम्।**

**तन्न शोभनम्**-एवं सति शक्तिज्ञानाधुनिकसङ्केतज्ञानयोरेकरूपेणैव हेतुत्वात् यत्र द्रव्यपदात् गुणवत्त्वादिना द्रव्यं बोद्धव्यमित्याकारकाधुनिकसङ्केतीयद्रव्यत्वावच्छिन्नविषयता द्रव्ये गृहीता, तत्र तादृशसङ्केतग्रहात् द्रव्यत्वेन द्रव्यबोधापत्तेर्गुणवत्त्वादिप्रकारकशाब्दबोधानुपपत्तेश्च दुर्वारत्वात्।

**। इति सामान्यकाण्ड: ।**

# अथ विशेषकाण्ड:।

**आकाशपदशक्तिविचारः**

अथ पदार्थांशे इव प्रकारीभूतधर्मांशेऽपि वाच्यत्वग्रहस्यापेक्षिततत्वे आकाशपदाच्छब्दाश्रयतया बोधो न स्यात्। शब्दाश्रयत्वस्य आकाशपदावाच्यताया: सिद्धान्तसिद्धत्वात्। अत एव तद्वारणायैव प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणोपादानमिति चेत्।

**न** - शब्दाश्रयत्वस्याकाशपदवाच्यत्वमनङ्गीकर्तृभि: प्राचीनैराकाशपदादाकाशांशे तदुपस्थाप्यधर्माप्रकारकशाब्दबुद्धेरेवोपगमात्। तदुक्तम् - **"अस्तु वा पदादपि निर्विकल्पकमिति"।** निर्विकल्पकत्वञ्च तदंशे तत्पदोपस्थाप्याप्रकारकत्वम्। न तु तदंशे सामान्यतो निष्प्रकारकत्वम्। विभक्त्युपस्थापितैकत्वादीनां तदंशे प्रकारताया आवश्यकत्वात्। तेन समं पदार्थान्तरस्य संसर्गानवगाहने तादृशबोधस्य शाब्दत्वासम्भवाच्च।

**वस्तुतस्तु** - तत्र निर्विकल्पकपदं तत्पदोपस्थाप्यवस्त्वविशेषितधर्मिविषयकशाब्दानुभव-जनकनिर्विकल्पकस्मरणपरम्। अत एव तत्र निर्विकल्पकरूपस्य स्मरणस्यानुपपत्ति:, अनुभवस्य स्वसमानप्रकारकमात्रस्मृतिजनकत्वादित्याशङ्क्य प्रकारान्तरेण तादृशस्मरणमुपपादितं **मिश्रै:।**

अत्र च मते जात्यतिरिक्तस्य तस्य स्वरूपत: पदार्थानुभवप्रकारत्वासम्भवादाकाशवासी-त्यादौ शाब्दबोधानुपपत्ति:। अन्वयितावच्छेदकावच्छिन्न एव पदार्थान्तरान्वय इति नियमानुप-पत्तिश्चेति पदार्थ इव पदार्थप्रकारीभूतधर्मांशेऽपि शक्तिग्रहापेक्षायां गोत्वादेर्गवादिपदवाच्यत्ववत् शब्दाश्रयत्वस्याकाशपदवाच्यत्वमस्त्येव।

अत एव **दीधितिकृता** गुणटिप्पण्यां रूपग्रन्थे **"अत्रेदं तत्त्वमि"** त्यादिना गोत्वादिना शब्दाश्रयत्वस्याविशेषं व्युत्पाद्य प्रकाशस्थप्रवृत्तिनिमित्तलक्षणे वाच्यत्वविशेषणस्योपादानं दूषितमेव।

**प्रत्यक्षमणिदीधितौ** च पदार्थांशे गोत्वादे: प्रकारतायां शक्यतावच्छेदकत्वस्य प्रयोजकत्व-मुपगम्य शक्यतावच्छेदके शक्तिर्दूषितैव। तत्रोक्तानुपपत्तिश्चिन्त्या।

**यत्तु** - शक्त्याऽऽकाशपदादष्टद्रव्यातिरिक्तद्रव्यत्वादिनाप्याकाशबोधो भवति, न तु नियमत: शब्दाश्रयत्वेनैव। तथा सत्याकाश: शब्दाश्रय इति सहप्रयोगस्य मुख्यतानुपपत्ति:। प्रत्येकं

नानाधर्मविशिष्ट एवाकाशे तत्पदस्य नानाशक्तिकल्पनं तु न सम्भवति। नानाधर्मावच्छिन्नैक-धर्मिण्येकपदवाच्यतायाः क्वाप्यदृष्टत्वादिति शब्दाश्रयत्वोपलक्षित एवाकाशपदशक्तिरिति प्राचीन-मतमेव साधु। उपलक्षणस्यापि विशिष्टावाचकपदजन्यशाब्दबोधे प्रकारत्वे न किञ्चिद्बाधकम्।

नच शब्दाश्रयत्वस्योपलक्षणत्वे तस्यैवाविशेषात्प्रमेयत्वादेरप्याकाशपदजन्यानुभवप्रकारता-पत्तिरिति वाच्यम्। तत्प्रकारकशाब्दबोधे तदंशेऽनतिप्रसक्ततत्वरूपशक्यतावच्छेदकत्वावगाहित्वे-नोपलक्षिते शक्तिज्ञानस्य हेतुत्वादिति।

**तन्न**-आकाशः शब्दाश्रय इति सहप्रयोगस्य मुख्यत्वासिद्ध्याऽष्टद्रव्यातिरिक्तद्रव्यत्वाकाश-पदवाच्यत्वाद्येकतररूपेण लक्षणाया एव तत्रोपगमात्।

एवञ्च यत्र सुवर्णवहनयोग्यगवादिरूपविशेषपरसामान्यवाचकपदघटितं द्रव्यं नास्ति, गौर्नास्तीत्यादिकं वाक्यं प्रयुज्यते, तत्र विशेषधर्मावाच्छिन्ने लक्षणैव। विशेषधर्मस्य सामान्यशब्दा-वाच्यतया शक्त्या तद्रूपप्रकारकबोधानिर्वाहात्।

एवं यत्र दुःखासम्भिन्नसुखत्वधानकर्मगोत्वादिविशिष्टवाचकं स्वर्गधेन्वादिपदं केवलसुखत्व-गोत्वाद्यवच्छिन्नतात्पर्येण प्रयुज्यते, तत्र लक्षणैव। शक्त्या प्रवृत्तिनिमित्तैकदेशं परित्यज्य न बोध इत्यनुभवनिर्वाहाय शुद्धतद्धर्मप्रकारकशाब्दबोधे तदन्यरूपावच्छिन्नत्वानवच्छिन्नबोधविशेष-विषयत्वीयप्रकारतात्वेन प्रकारताघटितसम्बन्धावगाहिशक्तिज्ञानस्य कारणत्वमुपगन्तव्यम्।

शक्यतावच्छेदके शक्यत्वानभ्युपगन्तृमते तादृशबोधे तद्रूपांशे सङ्केतविशेष्यतावच्छेदकता-पर्याप्त्यवगाहिज्ञानत्वेन हेतुत्वान्नोक्तातिप्रसङ्ग इति तूक्तानुपपत्त्या हेयम्।

यदि चाकाशः शब्दाश्रय इत्यादिवाक्यस्थमाकाशपदं मुख्यमेव। निर्धर्मितावच्छेदककश्च नान्वयबोधः कुत्रापि। तदाऽऽकाशादिपदात् शक्त्या अष्टद्रव्यातिरिक्त-द्रव्यत्वादिना बोधनिर्वाहाय विशिष्टावाचकाकाशादिपदस्य प्रकारांशे वाच्यत्वानवगाहिशक्तिग्रहस्यैव तद्धर्मावच्छिन्नविशेष्यक-तत्तद्धर्मप्रकारकान्वयबोधहेतुत्वमगत्या स्वीकार्यम्। विशिष्टवाचकगवादिपदस्य च प्रकारांशे वाच्यत्वावगाहिशक्तिज्ञानमेव

तद्धर्मप्रकारकशाब्दबोधहेतुरिति न शक्तिभ्रमलक्षणाग्रहमन्तेरण गवादिपदात् गोपदवाच्यत्वाद्यवाच्यधर्मप्रकारको बोधः।

आकाशादिपदमिव गवादिपदमपि विशिष्टावाचकमिति भ्रमवतो गवादिपदादवाच्यधर्मप्रकार-कबोधनिर्वाहाय तद्धर्मप्रकारकशाब्दबोधे तद्धर्मसामानाधिकरण्यमात्रावगाहितत्पदवाच्यतावगाहि-ग्रहस्य हेतुत्वेऽपि तद्धेतुतायां वाच्यतांऽशे विशेषणानन्तर्भावित्वावगाहित्वमप्यवच्छेदकमुपेयते। अतोऽवाच्यधर्मप्रकारकबोधहेतुगवादिपदशक्तिग्रहस्य भ्रमत्वनियमः। अतो नाभ्रान्तपुरुषस्य तत-स्तादृशबोध इति बोध्यम्।

**इति आकाशपदशक्तिविचारः ।।**

## धेनुपदशक्तिविचारः।

**प्राभाकरास्तु** - धेनुपदस्य धानकर्मताविशिष्ट एव शक्तिः, न तु गोत्वमपि विशेषणम्। गोत्वस्य शक्त्युपाधित्वेन शक्तिनियन्त्रकत्वात् धानकर्मत्वस्य महिष्यादिसाधारणत्वेऽपि न धेनुपदात्तद्बोधः।

नच धेनुपदात् गोत्वप्रकारकबोधस्यानुभविकतया धानकर्ममहिष्यादिमति देशे धेनुर्नास्तीति विशेषदर्शिनां प्रयोगस्य मुख्यतया च धेनुपदजन्यबोधे गोत्वभानमवश्यमङ्गीकरणीयम्। तथाच धानकर्मत्ववत् गोत्वेऽपि शक्तेरावश्यकतयाऽशक्यस्यापि प्रकारतया शाब्दबोधे भानोपगमे द्रव्यत्वप्रमेयत्वादेरपि प्रकारतया शाब्दबुद्धौ भानापत्तिरिति वाच्यम्। शाब्दबोधेऽशक्यस्य गोत्वादेः प्रकारतया भाने शक्यतावच्छेदकत्वस्य नियामकत्वात्। गोत्वस्य चाशक्यत्वेऽपि शक्यतायाम-वच्छेदकतात्मकसम्बन्धविशेषोपगमात् द्रव्यत्वादेश्चातथात्वेनातिप्रसङ्गविरहात्।

नच गोत्वस्य वृषभादिसाधारणस्यातिप्रसक्ततया शक्तौ नावच्छेदकत्वसम्भव इति वाच्यम्। अवच्छेदकत्वस्य प्रकृतेऽनतिप्रसक्तत्वानियतत्वात्। नियतत्वे वा धानकर्मत्वसहितस्यैव तस्यावच्छेदकत्वोपगमात्।

अथ गोत्वमेव शक्यं, धानकर्मत्वमेव शक्त्युपाधिरिति वैपरीत्यमेव कुतो न स्यात्। वस्तुतो धानकर्मत्वापेक्षया लाघवेन गोत्वस्यैव शक्यत्वमुचितम्।

नच गोत्वमतिप्रसक्तं, धानकर्मत्वन्तु धानकर्मव्यक्तिभेदेन भिन्नमिति गोनिष्ठं तदनतिप्रसक्तमिति न वैपरीत्यमिति वाच्यम्। तस्यातिप्रसक्तत्वेऽपि शक्यत्वोपगमे क्षति-विरहात्। वृषभादिबोधस्य शक्त्युपाधिधानकर्मत्वस्यापि प्रकारतया वारणात्।

नच गोत्वस्य शक्यत्वे जातिशक्त्यैव व्यक्तिभानसम्भवेनान्यलभ्यतया गवादिपदव-द्व्यक्तिशक्त्युच्छेदप्रसङ्गः। तथाच धानकर्मत्वस्य शक्यतावच्छेदकत्वानुपपत्त्या वृषभादिबोधो दुर्वार एवेति वाच्यम्। एतदनुरोधेनापि व्यक्तौ शक्तिस्वीकारसम्भवादिति चेत्,

न-यद्धर्मविशिष्टे शक्तिस्तद्धर्माश्रयस्य यावतः शक्यत्वनियमेन गोत्वस्य शक्यत्वे वृषभादेर-पि तथात्वापत्तेः। धानकर्मताविशिष्टायाः गोः शक्यत्वे च गोनिष्ठधानकर्मताव्यक्तीनामेव विशेषणतया, तासाञ्च महिष्यादिव्यावृत्ततया महिष्यादेश्च शक्यताऽऽपत्तिविरहादिति **वदन्ति।**

तन्मते यद्यपि शक्तिज्ञानाधुनिकसङ्केतज्ञानयोः कारणताभेदेन गौरवं न बाधकम्, भगवद्विद्वेषिणां मीमांसकानां शक्तेः सङ्केतानात्मकतया तयोरेककारणतायाः कथमप्यसम्भ-वात्, तथाऽपि गोनिष्ठधानकर्मताव्यक्तीनामनतिप्रसक्तानुगतरूपाभावान्न शक्यत्वसम्भवः।

नच सामानाधिकरण्यसम्बन्धेन गोत्वमेव धानकर्मत्वसहितं धानकर्मत्वविशेषाणामनुगम-कमिति वाच्यम्।

अशक्येन शक्यानुगमे सर्वत्रैव विशेषणशक्त्युच्छेदप्रसङ्गात्। अतिप्रसक्तेनापि धानकर्म-तात्वेन विशिष्टे धानकर्मताविशेषे शक्तिग्रहोपगमे लाघवात् गोत्वविशिष्टे गोविशेषे एव शक्ति-र्धानकर्मत्वमेव शक्त्युपाधिरित्येवोचितम्, अननुगतेन तत्तद्धानकर्मतात्वेन शक्तिग्रहोपगमे चापूर्वव्यक्त्यलाभप्रसङ्ग इत्यनुपपत्तिश्चिन्त्या।

**इति धेनुपदशक्तिविचारः ।।**

**पुष्पवन्तपदशक्तिविचारः।**

यथा नानाधर्मविशिष्टैकधर्मिवाचकात् पदात् शक्तिप्रमातो नैकधर्मं परित्यज्य धर्मी प्रतीयते, तथा चन्द्रत्वसूर्यत्वादिनानाधर्मविशिष्टनानाधर्मिवाचकपुष्पवन्तादिपदाच्चन्द्रत्वादिकं परित्यज्य न सूर्यत्वादिप्रकारको बोध:।

अथात्र हरिपदादिशक्तिज्ञानादिवद् दिवाकर: पुष्पवन्तपदवाच्य इत्याकारकशक्तिज्ञानात् केवलसूर्यत्वप्रकारको बोधो दुर्वार:।

नच पुष्पवन्तपदशक्तिज्ञानेन सूर्यत्वादिप्रकारकशाब्दबोधजनने चन्द्रत्वादिप्रकारकशक्ति-ज्ञानस्यापि सहकारितोपगमान्नातिप्रसङ्ग इति वाच्यम्। तस्य हर्यादिपदवन्नानार्थत्वग्रहदशायां भ्रान्तस्य केवलसूर्यत्वादिप्रकारकबोधस्याप्युत्पत्ते:।

एवं तत्पदस्य हर्यादिपदवन्नानाधर्मावच्छिन्नवाचकतया नानार्थत्वप्रसङ्गो दुर्वार:।

न चार्थद्वये तस्यैकस्या एव शक्तेरुपगमान्न नानार्थतापत्ति:, नानाशक्तिमत एव नानार्थत्वोपगमादिति वाच्यम्। शक्यतावच्छेदकभेदेन शक्तिभेदस्यावश्यकत्वादवच्छेदकभेदस्या-वच्छेद्यभेदनियतत्वात्। अन्यथा हर्यादिपदेष्वपि शक्त्यैक्यापत्ते:।

**अत्र शक्त्याख्यपदपदार्थसम्बन्धान्तरवादिमीमांसकानुयायिन:** - यथा धानकर्मत्वगोत्वादि-रूपशक्यतावच्छेदकभेदेऽपि धेन्वादिपदानां न शक्तिभेद:; अवच्छेदकताया व्यासज्यवृत्तित्वात्, तथा प्रकृते चन्द्रत्वसूर्यत्वयोर्व्यासज्यवृत्तिशक्यतावच्छेदकतास्वीकारान्न शक्तिभेद:। न वैकं परित्यज्यान्यप्रतीति:, केवलसूर्यत्वादिप्रकारकबोधे केवलतद्धर्मनिष्ठशक्यतावच्छेदकतापर्याप्त्यव-गाहिज्ञानस्य हेतुत्वात्, चन्द्रसूर्यत्वोभयांशे शक्यतावच्छेदकतापर्याप्त्यवगाहिज्ञानस्य चोभयप्रकार-कबुद्धित्वं कार्यतावच्छेदकम्। अतस्तादृशशक्तिज्ञानाच्चन्द्रत्वाद्यवच्छिन्नान्वयबोधौपयिकयोग्य-ताज्ञानाद्यसत्त्वे न सूर्यत्वाद्यवच्छिन्नान्वयबोधप्रसङ्ग:। नानार्थपदाच्च प्रत्येकधर्मावच्छिन्न-स्यापि प्रतीत्या तत्र प्रत्येकमेवावच्छेदकतापर्याप्तेरवश्योपगन्तव्यतया शक्यतावच्छेदताभेदेन शक्तिभेद:।

अथावच्छेदकताग्राहकमानेन धर्मिनिष्ठैकविशेष्यतानिरूपितविशेषणतापन्नेष्वेव नानाधर्मेष्व-वच्छेदकत्वपर्याप्तिर्गृह्यते। अतो महानसीयो नास्ति वह्निर्नास्तीत्या-कारकं महानसीयत्ववह्नि-त्वादिपुरस्कारेण पृथक् पृथक् प्रतियोगिविषयकं ज्ञानं महानसीयत्ववह्नित्वादिपर्याप्तप्रतियोगिता-वच्छेदकताकं विशेषाभावं नावगाहते, अपि तु शुद्धवह्नित्वावच्छिन्नाभावादिकमेवेति कथं दिवाकरनिशाकरशक्तं पुष्पवन्तपदमित्यादिशक्तिग्रहे चन्द्रत्वसूर्यत्वोभयस्मिन् शक्यतावच्छेद-कत्वपर्याप्तिभानम्, तत्र धर्मिणोश्चन्द्रसूर्ययोर्भेदेन तन्निष्ठविशेष्यताया ऐक्यासम्भवादिति चेत्।

न - यतो यत्रावच्छेदकीभूतव्यासज्यवृत्तिधर्मान्तरधर्मितावच्छेदकतया धर्मद्वयादेर्भानं, तत्र विभिन्नधर्मिविशेषणतापन्नेष्वपि तावद्धर्मेष्वेकावच्छेद्यनिरूपितावच्छेदकतापर्याप्तिः प्रतीयते। कथमन्यथा घटपटौ न स्त इत्याकारकोभयत्वावच्छिन्नाभावप्रतीतौ घटपटादिरूपप्रतियोगिविषय-ताया भेदेऽप्यभावविषयताया ऐक्येन समूहालम्बनविलक्षणायामुभयत्वादिधर्मितावच्छेदकतया भासमानघटत्वादिषु तादृशाभावप्रतियोगितावच्छेदकत्वपर्याप्तिभानम्।

एवञ्च दिवाकरनिशाकरयोः शक्तमेतत्पदमित्याकारकग्रहे शक्तिविषयताया ऐक्येन समूहालम्बनविलक्षण उभयत्वधर्मितावच्छेदकतापन्नचन्द्रत्वसूर्यत्वयोरेकशक्यतावच्छेदकत्वपर्या-प्तिभानमविरुद्धमिति न दोषः।

न चैवमुभयाभावप्रतियोगितायामुभयत्वस्येव प्रकृत उभयत्वस्याप्यवच्छेदककोटिप्रवेशप्रसङ्ग इति वाच्यम्। अभावबुद्धौ प्रतियोग्यंश उपलक्षणस्याप्रकारत्वनियमादुभयत्वस्य प्रतियोगिता-वच्छेदकत्वध्रौव्यात्। शक्तिग्रहे च शक्यांश उपलक्षणस्योभयत्वस्य प्रकारत्वोपगमेन तस्य शक्यतानवच्छेदकत्वात्।

अस्तु वा प्रकृते उभयत्वसहितमेव चन्द्रत्वसूर्यत्वोभयं शक्यतावच्छेदकम्। द्वावित्यत्रेव पुष्पवन्तावित्यत्रापि प्रकृतिविभक्तिभ्यामुपस्थापितस्य सकृदेव भानम्। विरुद्धयोरेकावच्छेदकत्व-पर्याप्तिरपिघटत्वपटत्वाद्योरुभयाभावप्रतियोगितावच्छेदकत्वपर्याप्तिवत् प्रकृते न विरुध्यते।

न च घटपटौ न स्त इत्यत्रोभयत्व एव प्रतियोगितावच्छेदकत्वं भासते न तु घटत्वपट-त्वादाविति वाच्यम्। केवलोभयत्वे तादृशाभावप्रतियोगितावच्छेदकतायाः पर्याप्तौ यत्किञ्चिदुभय-वति तादृशाभावप्रतीत्यनुपपत्तेः।

न च सामानाधिकरण्यसम्बन्धेन घटत्वपटत्वरूपावच्छेदकत्वावच्छेदकधर्मेण व्यावृत्तोभय-त्वविशेषस्यैव तत्रावच्छेदकत्वं प्रतीयत इति वाच्यम्। तेन तेन प्रकारेण तत्रोभयत्वस्याभाना-त्तत्तद्रूपाणां तत्तद्धर्मिविशेषणतयैव भानादतिप्रसक्तधर्मप्रकारेण भासमाने चावच्छेदकतापर्याप्ति-भानानुपगमात्। तत्रोभयत्वविशेषेऽभावप्रतियोगितावच्छेदकत्वपर्याप्त्युपगमे अत्राप्युभयत्वविशेषे शक्यतावच्छेदकत्वपर्याप्तिसम्भवाच्चन्द्रत्वसूर्यत्वयोरवच्छेदकतावच्छेदकतयैव शाब्दबोधे भानोप-पत्तिः।

न च शाक्यतावच्छेदकतावच्छेदकमवच्छेदकविशेषणतयैव भासत इति चन्द्रत्वसूर्यत्वयो-स्तथात्वे चन्द्रसूर्यांशे प्रकारतया शाब्दबोधे भानानुपपत्तिरिति वाच्यम्। तयोरवच्छेदकतावच्छेदक-त्वेऽपि शक्तिग्रहेऽवच्छेदकाश्रयचन्द्रसूर्यविशेषणतयैव भानात् शाब्दबोधेऽपि तद्विशेषणतया भानसम्भवात्।

अथ शक्तिग्रहे साक्षात् शाक्यतानवच्छेदकस्य तदुभयस्य शक्यचन्द्रसूर्योभयांशे साक्षात्प्रका-रतया भानं न सम्भवतीति चेत्। घटपटौ न स्त इत्यादौ घटत्वपटत्वयोः साक्षात् प्रतियोगितावच्छेदकत्वमन्तरेण प्रतियोगिविशेषणतया भानासम्भवस्तुल्य **एवेत्याहुः।**

**ज्ञानशक्तिवादिनस्तु** - चन्द्रत्वसुर्यत्वोभयप्रकारकज्ञानमेव पुष्पवन्तपदशक्यं, पुष्पवन्तपदमु-भयप्रकारकज्ञाने शक्तमित्याकारकशक्तिग्रहस्य तादृशज्ञानत्वमेव कार्यतावच्छेदकमिति व्युत्पत्तिमतः पुरुषस्य नैकैकबोधापत्तिः। अतोऽतादृशस्य भवत्येव तादृशबोधः।

न चैवमपि पुष्पवन्तपदं चन्द्रत्वप्रकारकज्ञाने शक्तमित्यादिबोधस्य प्रमात्वात् शक्तिभ्रमं विना प्रत्येकशाब्दबोधानुदय इति कथमुपपद्यत इति वाच्यम्। केवलचन्द्रत्वप्रकारकबोधे तत्तत्प्रकारकबोधत्वांशे शक्तिनिरूपकतावच्छेदकतावच्छेदकतापर्याप्तिग्रहस्य हेतुत्वात्। प्रकृत

उभयप्रकारकबोधत्वाद्यंशे शक्तिनिरूपकतावच्छेदकत्वपर्याप्त्यभ्युपगमात् तादृशस्य चन्द्रत्वप्रकार-कज्ञाने शक्तमित्यादिबोधस्य भ्रमत्वनियमा**दित्याहु:।**

ईश्वरेच्छारूपस्य सङ्केतस्य शक्तित्वमङ्गीकर्तृ**सिद्धान्तिपक्षे** पुष्पवन्तपदाच्चन्द्रत्वावच्छि-न्नविषयकसूर्यत्वावच्छिन्नविषयकशाब्दबोधो भवत्वित्याकारक एव तादृशपदे भगवत्सङ्केत:। केवलचन्द्रत्वावच्छिन्नविषयकबोधश्च न तत्पदजन्यत्वेन तद्विषय इति तादृशपदान्न तथाविधबोध:।

न च तादृशपदजन्यत्वेन केवलचन्द्रत्वावच्छिन्नविषयकबोधस्य सङ्केताविषयत्वेऽपि चन्द्र-त्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन सङ्केतविषयकग्रहस्य चन्द्रत्वादिप्रकारकबोधजनकस्य सूर्यत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन संकेतग्रहघटितसूर्यत्वाद्यवच्छिन्नविषयकबोधसाम-ग्र्यामसत्यामपि सम्भवेन तद्बलादभ्रान्तस्य केवलचन्द्रत्वावच्छिन्नविषयकबोधो दुर्वार एवेति वाच्यम्।

तत्पदजन्यकेवलचन्द्रत्वादिप्रकारकबोधे तत्पदजन्यकेवलचन्द्रत्वावच्छिन्नविषयकबोधत्व-पर्याप्तविषयतावच्छेदकताकत्वप्रकारकसङ्केतविषयकज्ञानस्य हेतुत्वात्।

पुष्पवन्तपदजन्यबोधत्वघटितभगवत्संकेतविषयतावच्छेदकशरीरे च सूर्यत्वावच्छिन्नविषय-कत्वचन्द्रत्वावच्छिन्नविषयकत्वयोरेकत्र निवेशात् तत्पदजन्यप्रत्येकधर्मावच्छिन्नविषयकबोधत्वे संकेतविषयतावच्छेदकत्वपर्याप्तिविरहात् तदंशे तत्पर्याप्त्यवगाही ग्रहो भ्रम एवेति न शक्तिप्रमात: प्रत्येकधर्मप्रकारकबोधापत्ति:।

तत्पदजन्यचन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकबोधत्वपर्याप्तविषयतावच्छेदकता कत्वप्रकारकशक्तिग्रहस्य चोभयधर्मप्रकारकबुद्धित्वमेव कार्यतावच्छेदकम्। अतो न तद्घटितसाम-ग्रीबलादेकधर्मावच्छिन्नान्वयबोधस्य यत्किञ्चित्कारणविरहदशायामपरधर्मप्रकारकशाब्दबोधापत्ति:।

उभयविषयकत्वावच्छिन्नायाः बोधनिष्ठसंकेतविषयतायाः ऐक्यात् शक्तेरैक्यमिति न तत्पदस्य नानार्थतेति रमणीय: समाधि:।

**"एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ"** इत्य**मरकोशे** उक्तिपदं शक्तिपरम्। पुष्पवन्तपदं तत्प्रतिपाद्यपरम्। तथा च सूर्याचन्द्रमसावेकशक्त्या पुष्पवन्तपद-प्रतिपाद्यावित्यर्थः। उद्देश्यता-वच्छेदकावच्छेदेन विधेयान्वये तात्पर्याच्चन्द्रत्वसूर्यत्वयोरेकशक्त्यधीनप्रतिपत्तिविषयतावच्छेद-कत्वलाभः। नातस्तस्मात् नानार्थादिव तादृश एकधर्मावच्छिन्नविषयकबोधः, नानार्थे शक्तिभेदेन विशेषादिति लभ्यते।

अथवै**कयोक्त्या** - एकोच्चारणेन सूर्याचन्द्रमसौ पुष्पवन्तपदप्रतिपाद्यावित्यर्थः। तथा च यथा नानार्थस्थले नाऽऽवृत्तिमन्तरेण नानार्थबोधस्तथा न प्रकृते। अत्र शक्तेरैक्येन सकृदुच्चरितात् सकृदर्थप्रत्यय एवेत्यस्याविषयत्वादिति भावः।

**इति पुष्पवन्तपदशक्तिविचारः ।।**

**सर्वनामपदशक्तिविचारः।**

पुष्पवन्तपदवत् सर्वनामपदानामपि शक्तेरैक्यान्न नानार्थता।

अथ सर्वनामपदेन विशिष्य घटत्वपटत्वादिनैव बुद्धिस्था घटपटादयः प्रत्याय्यन्ते न तु बुद्धिस्थत्वेन; अत्र घटोऽस्ति तमानयेत्यादिवाक्यजघटकर्मकानयनादिबोधानन्तरं विशिष्यानयनं घटकर्मकं न वेति संशयानुत्पादस्य सर्वानुभवसिद्धतया दुरपह्नवत्वात्।

तथा च वक्तृबुद्धिस्थत्वं न सर्वनामशक्यतावच्छेदकम्, अपि तु घटत्वपटत्वाद्येव। तादृशनानाधर्मावच्छिन्नेषु पुष्पवन्तादिपदवन्नैकशक्तिसम्भवः एकैकधर्ममात्रप्रकारकतत्तदर्थबोधा-नुपपत्तेरिति सर्वनाम्नो नानार्थत्वं दुर्वारमेव। न वा नानार्थतोपगमेऽपि निर्वाहः। यद्रूपावच्छिन्न-विषयकव्यवहारजनकत्वं येन पुंसा तदादिपदे न गृहीतं तदवच्छिन्ने तेन तच्छक्त्यग्रहेण प्रक्रान्तस्यापि तदवच्छिन्नस्य तत्पुरुषीयतदादिपदजन्यबोधविषयतानुपपत्तेः।

न च बुद्धिस्थत्वं प्रकारीभूतघटत्वादीनामेवानुगमकम्। तथा च बुद्धिप्रकारवांस्तत्पदशक्य इत्याकारक एव शक्तिग्रहः। स च तद्धर्मप्रकारेण सकलतद्धर्मविषयक एव सामान्यप्रत्यासत्त्या सम्भवतीति नापूर्वप्रकारेण बोधानुपपत्तिः। सामान्यलक्षणानभ्युपगमे तु शक्तिग्रहविशेष्यता-वच्छेदकप्रकाराश्रयस्यापूर्वधर्मिणः शक्तिग्रहाविषयत्वेऽपि शाब्दबोधे भानवत् शक्तिग्रहधर्मिता-

वच्छेदकतावच्छेदकानुगतरूपाश्रयस्यापूर्वधर्मस्यापि शक्तिग्रहविषयतां विना शाब्दबोधे न भानानुपपत्तिः, शक्तिधियः शाब्दज्ञानसमानविषयकत्वस्यातन्त्रत्वादिति वाच्यम्।

बुद्धिस्थत्वस्य शक्यतावच्छेदकतानवच्छेदकत्वेन शक्यतावच्छेदकानुगमकत्वायोगात्। तदवच्छेदकत्वे च तस्यापि शाब्दबुद्धौ शक्यतावच्छेदकघटत्वादिविशेषणतया नियमतो भानप्रसङ्गात्। स्वरूपतो घटत्वादिप्रकारकशाब्दबोधानिर्वाहात्। उपलक्षणे-नापि शक्यतावच्छेदकानुगमे शक्यस्याप्युपलक्षणेनैवानुगमोऽस्तु किं विशिष्टे शक्त्या।

**अथ** द्रव्यादिपदात् घटत्वादिप्रकारकबोधप्रसङ्गवारणाय विशिष्टे शक्तिरुपेयते। प्रकृते च बुद्धिस्थत्वस्योपलक्षणत्वेऽपि तेनानुगमने न किञ्चिद्बाधकमिति चेत्।

अस्तु बुद्धिस्थत्वेनानुगतधर्मेणाननुगतानां प्रकाराणां शक्तिधीविषयत्वम्। तथाऽपि सर्वनाम्नां नानार्थत्वं दुष्परिहरमेव। साक्षात्परम्परया वा यदवच्छेदकं तदैक्यादेवावच्छेद्यैक्यात्। बुद्धिस्थत्वस्यातथात्वात्। उपलक्षणैक्येन शक्तैरैक्ये हर्यादिपदशक्यतावच्छेदकानामप्युपलक्षणीभूतेनान्ततो बुद्धिविषयत्वादिनाऽनुगमसम्भवेन नानार्थमात्रोच्छेदप्रसङ्गात्।

एवं बुद्धिस्थप्रकारवान् तत्पदशक्य इत्याकारकशक्तिज्ञानात् स्वरूपतो घटत्वादिप्रकारकस्मरणशाब्दबोधौ न सम्भवतः। जातिमान् हस्तिपकसम्बन्धीत्यादिज्ञानात् स्वरूपतो हस्तित्वप्रकारकस्मरणानुदयात् स्वरूपतस्तद्धर्मप्रकारेण यस्य सम्बन्धो गृहीतस्तादृशसम्बन्धिज्ञानस्य कारणत्वात्। यथा याभ्यां रूपाभ्यां धर्मिणोः सम्बन्धो गृहीतस्तदेकतररूपप्रकारकसम्बन्धिज्ञानादेवापरतद्रूपेणैव सम्बन्ध्यन्तरस्मरणमित्यनुभवस्तथा यादृशरूपाभ्यां धर्मिणोः सम्बन्धग्रहस्तादृशैकधर्मप्रकारकज्ञानादेव तादृशापरधर्मप्रकारेण धर्मिस्मरणमित्यपि। तथा च यत्र किञ्चिद्विशेषितधर्मप्रकारकसम्बन्धज्ञानं तत्राविशेषिततद्धर्मप्रकारकस्मरणस्याननुभविकतयेष्टापत्तेरयोगात्। अन्यथा कदाचित् स्वरूपतस्तत्प्रकारिका कदाचिद्धर्मान्तरावच्छिन्नतत्प्रकारिका स्मृतिरित्यत्र नियामकाभावप्रसङ्गात्।

सामान्यलक्षणामनङ्गीकुर्वतां पुनरनिष्कृतिरेव। शक्तिग्रहाविषयस्यापूर्वधर्मस्य स्वरूपत: कथमपि भानासम्भवात्। न हि बुद्धिविषयतावच्छेदकत्वेन धर्मान्तरविषयकज्ञानं स्वरूपतोऽपर-धर्मप्रकारकं ज्ञानं जनयितुं प्रभवति। तथा सति समानप्रकारकत्वनियमस्यापि भङ्गप्रसङ्गादिति।

**मैवम्** - भगवत्सङ्केतरूपायां शक्तौ शक्यतावच्छेदकीभूतघटत्वपटत्वादावुपलक्षणीभूतबुद्धि-विषयतावच्छेदकत्वप्रकारेण भासमाने तदादिपदजन्यबोधविषयतावच्छेदकत्वं भासते। एवञ्च बुद्धिविषयतावच्छेदकरूपावच्छिन्नस्तत्पदाद्बोद्धव्य इत्याकारकस्य तत्पदं बुद्धिविषयतावच्छेदक-रूपावच्छिन्नं बोधयत्वित्याकारकस्य वा संकेतस्य विषयताया अननुगतघटत्वपटत्वादिनिष्ठाया अप्यनुगतबुद्धिविषयतावच्छेदकत्वरूपावच्छिन्नतया शक्तेरैक्यम्।

घटपदादिसंकेतविषयतानां नानाघटादिव्यक्तिनिष्ठानां घटत्वाद्यनुगतधर्मावच्छिन्नत्वेन पशवादिपदसंकेतविषयतानां प्रकारीभूतनानालोमादिव्यक्तिनिष्ठानां लोमत्वाद्यनुगतधर्मावच्छिन्न-त्वेन तत्तत्पदशक्त्यैक्यवदननुगतसिंहत्वादिनिष्ठानां नानार्थहर्यादिपदसंकेतविषयतानामनुगतय-त्किञ्चिद्धर्मावच्छिन्नत्वाभावात् न शक्तेरैक्यम्।

तत्रोपलक्षणीभूतकिञ्चिद्धर्मप्रकारेणाभासमानस्यैव सिंहत्वादेर्भगवत्संकेतरूपायां शक्तौ हर्यादि-पदजन्यबोधविषयतावच्छेदकत्वं भासत इति न नानार्थमात्रोच्छेद इति।

**इयांस्तु विशेष:** - तत्र घटत्वलोमत्वादिषु तत्तत्पदजन्यबोधविषयतावच्छेदकत्वं भासत इति तानि विशेषणान्युच्यन्ते। प्रकृते च बुद्धिविषयतावच्छेदकत्वे सर्वनामपदजन्यबोधविषयता-वच्छेदकत्वं सङ्केतेन नावगम्यते, अपि तु तादृशविषयतासामानाधिकरण्यमात्रमिति तदुपलक्षणमिति गीयते।

यद्यपि घटादिपदसङ्केतस्य घटत्वादिविशिष्टविषयकत्ववत् सर्वनामसङ्केतेन बुद्धिविषयतावच्छेदकत्वे बोधविषयतावच्छेदकत्वानवगाहनेऽपि सङ्केतस्य तद्विशिष्टविषयकत्व-मक्षतमेवेति सङ्केतविषये तद्विशेषणमेव। एवं शक्यविशेषणघटत्वादिनिष्ठे बोधविषयतावच्छेद-कत्वरूपबोधविषयतानिष्ठसङ्केतविषयतानिरूपितविषयतारूपशक्यत्वे तदवच्छेदकमपि।

तथापि बोधविषयतया सङ्केतविषयत्वरूपशक्यतायास्तत्रासत्त्वेन शक्ये न तद्विशेषणम्, शक्यव्यावर्तकशक्यस्यैव शक्यविशेषणत्वादिति तस्य शक्योपलक्षणतयाऽऽकाशपदजन्यशाब्दबोधे शब्दाश्रयत्वभानानियमवत् तदादिपदजन्यबोधे तदभाननिर्वाहः।

तद्बीजन्तु तदुपलक्षितघटत्वादिविषयकत्वेन तदविषयकघटत्वादिबोधस्यापि सङ्केत-विषयत्वम्। घटादिपदसङ्केतस्य च घटत्वादिविशिष्टविषयकबोध एव विषय इति तज्जन्यबोधे तादृशधर्मभाननियमः। यथा यद्विशिष्टविशेष्यकबोधविषयत्वं सङ्केतविषयस्तच्छक्यतावच्छेदक-तया व्यवह्रियते, तथा यद्विशिष्टप्रकारविशिष्टविशेष्यकबोधविषयत्वं तथा तच्छक्यतावच्छेद-कदकतावच्छेदकमित्युच्यते। प्रकृते च बुद्धिविषयतावच्छेदकत्वन्न तथेति न तच्छक्यताव-च्छेदकम्, न वा तत्त्वावच्छेदकम्। जातित्वादिविशिष्टघटत्वाद्यविच्छिन्नस्य तदादिपदाद्यधीन-बोधे तु बुद्धिविषयतावच्छेदकतावच्छेदकत्वोपलक्षितधर्मविशिष्टावच्छिन्नविषयकत्वावगाही सङ्केतः प्रयोजक इति तत्र जातित्वावच्छिन्नघटत्वादिनिष्ठप्रकारतैव विषय इति न जातिमानित्यादि-बोधकाले घट इत्याकारकबोधः।

अथ किञ्चित्प्रकारेण भासमानधर्मेऽवच्छेदकत्वे भासमाने तद्विशिष्ट एव भासते न तदुपलक्षित इति नियमः। कथमन्यथा स्वरूपतो घटत्वावच्छिन्नाभावस्य न जातिमान्नास्तीत्या-कारिका प्रतीतिः। एवञ्च बुद्धिविषयतावच्छेदकत्वोपलक्षिते कथं बोधविषयावच्छेदकत्वं सङ्केते-नावगाहनीयमिति चेत्।

न - अवच्छेदकताया अवच्छेद्याश्रयविशेषणतापन्नस्य संसर्गविधया भान एव तथा नियमात्। अन्यथा धूमव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववानित्याकारकव्यापकता-वच्छेदकत्वोपलक्षितवह्नित्वाद्यवच्छिन्नाभावप्रतीत्यनुपपत्तेः।

प्रकृते च तत्पदं बुद्धिस्थप्रकारावच्छिन्नविषयताकबोधं जनयत्वित्याकारकोऽवच्छेद्या-वच्छेदकभावप्रकारक एव सङ्केतोऽङ्गीकार्य इत्यनुपपत्तेरभावात्। स्वरूपतो घटत्वादिप्रकारक-स्मरणाद्युपयोगी शक्तिग्रहः स्वरूपतो घटत्वादिप्रकारक एव। यदा स्वरूपतो यद्धर्मप्रकारकज्ञान-सामग्री तदैव स्वरूपतस्तद्धर्मप्रकारेण शक्तिं गृहीत्वा स्वरूपतस्तत्प्रकारेण धर्मिणं

स्मरत्यनन्तरमनुभवति च। मानसे च शक्तिग्रहे न व्यवहारदर्शनादेरपेक्षा। अपि त्वसंसर्गाग्रह-सहितोपस्थितेरेवेति, यद्धर्मावच्छिन्ने तदादिपदघटितवाक्यात् व्यवहारो न दृष्टस्तदवच्छिन्नस्यापि मानसशक्तिग्रहात् बोध: सुघट एव।

न च व्यवहारदर्शनाद्यविषये मनसा शक्तिर्निश्चेतुं न शक्यते विपरीतकोटेरप्युपस्थिति-मात्रेण मानसज्ञाने भानसम्भवादिति वाच्यम्। उपस्थितस्यापि बाधितस्य दोषमन्तरेणाभाना-न्निश्चयस्याप्युपपत्ते:।

एवं सति कतिपयविषयेषु सर्वनामघटितवाक्यात् प्रयोज्यस्य प्रवृत्तिमुपलभमान: प्रवर्तक-ज्ञानविषयकतिपयविषये शक्तिं कल्पयन् बुद्धिविषयतावच्छेदकधर्मावच्छेदेन तत्पदशक्यत्वं सामान्यतोऽवधारयति। एवञ्च चैत्रोऽस्य बुद्धिविषयतावच्छेदकधर्मवानिति यदा तेन गृह्यते तदानीमस्य चैत्रस्तत्पदवाच्यो न वेति सन्देहो नावतरितुमर्हति। यादृशधर्मावच्छेदेन यदवधारितं तादृशधर्मनिश्चयस्य स्वसमानधर्मितावच्छेदककतद्विरोधिकोटिभानविरोधित्वादिति सम्भवत्येवा-पूर्वविषयेऽपि मानस: शक्तिनिश्चय:।

अथैवमपि तत्पदे चैत्रत्वविशिष्टवाचकतासन्देहस्य दुरुच्छेदतया तत्पदाद्व्यवहारदर्शना-विषयचैत्रत्वावच्छिन्नविषयकशाब्दबोधो दुरुपपाद एव। तद्धर्मप्रकारकशाब्दबोधे तद्धर्मविशिष्टवा-चकतानिश्चयस्य हेतुत्वात्। अन्यथा गवादिपदादभ्रान्तस्य शक्त्या सास्नादिमत्त्वप्रकारेण शाब्दबोधापत्तेरिति चेत्।

न - तत्पदप्रयोजकबुद्धिप्रकारतया गृहीतघटत्वपटत्वादिविशिष्टे व्यवहारदर्शनात् तत्पदस्य शक्तिं गृहीत्वा यद्यत्तत्पदं यादृशयादृशधर्मावच्छिन्नविषयकबुद्ध्या प्रयुज्यते तत्तत् तत्पदं तद्धर्मविशिष्टशक्तमिति सामान्यतो व्याप्तिमवधारयति। तदनन्तरञ्च प्रत्यक्षगृहीतचैत्रत्वादि-विशिष्टविषयकबुद्धिप्रयोज्यत्वं प्रकरणादिना यत्र तत्पदे गृहणाति तत्र पक्षे तादृशहेतुना चैत्रत्वविशिष्टवाचकत्वस्य प्रागसिद्धस्यापि पक्षधर्मताबलादनुमित्यात्मकनिश्चयेनावगाहनसम्भवात् न काऽप्यनुपपत्ति:।

**केचित्तु** बुद्धिविषयतावच्छेदकत्वेनानुगतधर्मेण सकलधर्मविषयकसंस्कारस्य सामान्यप्रत्यासत्यधीनानुभवजन्यस्य सत्त्वे प्रमुष्टबुद्धिविषयतावच्छेदकतांशं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं निराबाधमिति तन्मूलकमेव स्वरूपतोऽपूर्वचैत्रत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति किमनुपपन्नम्। स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोरनपेक्षणात्। उद्बोधकवैचित्र्यादेव कदाचिज्जातिमान् इत्याकारकं कदाचित् घट इत्याकारकं स्मरणमिति नियमोपपत्तेः। स्वरूपतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतोऽपि जातित्वादिना घटत्वादिप्रकारकात् संस्कारात् कदाचित् स्वरूपतो घटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्मरणोदयेन स्वरूपतस्तत्प्रकारिकायां स्मृतौ तादृशसंस्कारानुभवयोर्विशिष्य हेतुत्वेऽप्युद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकताया आवश्यकत्वात्, तादृशहेतुताया अप्रामा-णिकत्वात्।

कथमन्यथा विशेषणान्तरानवच्छिन्नास्मदाद्यदृष्टशरीरविशेषनिष्ठजातिविशेषावच्छिन्नसङ्केतितरामरावणादिपदेभ्यो वाक्यार्थधीरस्माकम्।

कथं वा निर्विशेषणकातीन्द्रियजातिविशेषावच्छिन्नवाचकमनःपदात् शाब्दधीः। तत्र जातित्वादिना जातिविशिष्टे शक्तिग्रहेण प्रमुष्टजातित्वांशं मनस्त्वादिप्रकारकं शक्तिस्मरणम्, तत्रापि विशेषणांशमोषमन्तरेण गत्यन्तराभावादिति **वदन्ति।**

**विवदन्तेऽप्यत्र बहवः** - स्मृतेर्विलक्षणप्रकारतायां संस्कारानुभवयोः प्रयोजकत्वस्योद्बोधकविशेषप्रयोजकतामाश्रित्योच्छेदने विशेष्यविशेषणभावांशेऽप्युद्बोधकविशेषस्यैव नियामकत्वसम्भवात् प्रकारत्वविशेष्यत्वानन्तर्भावेण सामान्यतस्तद्विषयकस्मृतौ तद्विषयकत्वेनैव संस्कारानुभवयोर्हेतुतापत्तेः। रावणादिपदेभ्यः लक्षणया तत्तत्पदार्थत्वादिप्रकारक एवान्वयबोधः।

**वस्तुतस्तु** - अनुगतोद्बोधकस्थले स्वरूपतस्तत्प्रकारकशक्तिज्ञानसत्त्वे स्वरूपतस्तत्प्रकारकस्मरणापत्त्या तत्र तादृशज्ञानस्य हेतुत्वमावश्यकमित्यलमतिपल्लवितेन।

अथ सामान्यतो वक्तृबुद्धिविषयतावच्छेदकधर्मावच्छिन्नस्य सर्वनामशक्यत्वे शक्तिभ्रमं विना कालान्तरीणपुरुषान्तरीणबुद्धिविषयतावच्छेदकधर्मावच्छिन्नविषयिका प्रतीतिः सर्वनाम्ना न जन्यते, अपि तु यो यदा यस्य बुद्धिस्थस्तदा तदुच्चरितपदात्तत्प्रकारावच्छिन्नविषयिकैवेति

नियमानुपपत्तिः। स्वोच्चारणानुकूलबुद्धिविषयतावच्छेदकावच्छिन्नस्य शक्तिविषयत्वे च स्वपदस्य तत्तद्व्यक्तिपरतया तत्तत्पदव्यक्तिभेदेन शक्तिभेदप्रसङ्गः, अननुगमात् व्युत्पत्ति-विरोधश्च।

एवं युष्मदस्मत्पदयोरात्ममात्रे न शक्तिः, अपि तु सम्बोध्योच्चारणकर्त्रोरेव। सम्बोध्यतावच्छेदकत्वोच्चारयितृतावच्छेदकत्वरूपानुगतधर्मोपलक्षितचैत्रात्मत्वादिकमेव प्रवृत्तिनिमित्तमित्यप्यसङ्गतम्। सामान्यतः सम्बोध्यतावच्छेदकत्वादेरनुगमकत्वे चैत्रस्य यत्पदसम्बोध्यता तस्मात् युष्मत्पदात् पदान्तरसम्बोध्यमैत्रादेः चैत्रोच्चारितादस्मत्पदात् पदान्तरोच्चारयितुश्च मैत्रादेः प्रतीतिप्रसङ्गो दुर्वार इति।

स्वजन्यबोधाश्रयतया प्रयोक्त्रभिप्रायविषयतावच्छेदकत्वरूपस्वसम्बोध्यतावच्छेदकत्वोप-लक्षितधर्मावच्छिन्ने युष्मत्पदस्य, स्वोच्चारणकर्तृत्वावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने चास्मत्प-दस्य शक्तेः स्वीकरणीयतया स्वत्वान्तर्भावेणाननुगमतादवस्थ्यादिति चेत्।

न-स्वोच्चारणानुकूलबुद्धिप्रकारावच्छिन्नविषयताकत्वस्वजन्यत्वोभयसम्वन्धेन तदादिसर्वनाम-पदप्रकारको बोधविषयकसङ्केतोऽभ्युपेयते।

तत्र च स्वपदार्थस्य सम्बन्धाघटकतया तत्तत्पदव्यक्तितत्वेन पदानां न विषयता, अपि तु तत्तत्पदत्वादिरूपानुपूर्वीविशेषप्रकारेणैवेति न पदव्यक्तिभेदेन शक्तिभेदः।

सामान्यतस्तत्पदत्वादिरूपानुपूर्वीविशेषावच्छेदेनैवोभयसम्बन्धावच्छिन्नबोधविषयतानिरूपित सङ्केतप्रकारता

ग्राह्येति न व्युत्पत्त्यनुपपत्तिः।

कालान्तरीणपुरुषान्तरीणबुद्धिश्च नेदानीन्तनैतत्पुरुषीयतत्पदादिपदोच्चारणानुकूलेति तद्वि-षयताच्छेदकावच्छिन्नबोधे नोपदर्शितोभयसम्बन्धेनैतत्तत्पदादिवैशिष्ट्यम्। अतो नेश्वरेच्छायां तादृशबोधस्यैतत्तदादिपदप्रकारेण भानमिति न कालान्तरीणपरुषान्तरीणबुद्धिविषयतावच्छेदका-वच्छिन्नस्यैतत्तदादिपदवाच्यता।

भगवत्सङ्केतीयतत्पदव्यक्तिप्रकारतानिरूपिततथाविधसंसर्गविषयताऽन्त:पातिबुद्धिविषयतावच्छेदकावच्छिन्नविषयताया एव तद्वाच्यतारूपत्वात्। अतो न भ्रमं विना तदवच्छिन्नबोध:।

तद्धर्मावच्छिन्नविषयताशालिबोधे पदांशे तद्धर्मावच्छिन्नविषयताघटितोक्तोभयसम्बन्धावच्छिन्नाया बोधनिष्ठविशेष्यतानिरूपितसङ्केतीयप्रकारताया वाचकतारूपाया: प्रकारतया संसर्गतया वा ज्ञानस्य हेतुत्वात्, अन्यधर्मावच्छिन्नं बुद्धिस्थीकृत्य प्रयुक्ते पदेऽन्यधर्मावच्छिन्न-विषयताघटितोभयसम्बन्धावच्छिन्नसङ्केतीयप्रकारताया असत्त्वात्, तत्र तदवगाहिज्ञानस्य भ्रमत्वनियमात्।

**इति सर्वनामपदशक्तिविचारः ।।**

## युष्मदस्मत्पदशक्तिविचारः।

युष्मदस्मत्स्थलेऽपीदृश्येव रीतिश्चिन्तनीया।

अथ स्वसम्बोध्ये युष्मद: स्वोच्चारयितरि चास्मद: शक्तौ **"देव्युवाच-मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता"** इत्यादिऋष्यादिवाक्यात् देवीकर्तृकमहिषासुरकर्मकघातादिबोधानुपपत्ति:। तत्र देव्युच्चरितत्वस्य महिषासुरसम्बोध्यत्वस्य चाभावात्। ऋष्यादिकर्तृकसुरथकर्मकघातादि-बोधस्य च योग्यताभ्रमादापत्तिश्च, ऋष्यादेस्तादृशवाक्यप्रयोक्तृत्वात् सुरथादेश्च तत्सम्बोध्यत्वा-दिति चेत्।

न-तत्र तादृशानुपूर्वीप्रकारेण सामान्यप्रत्यासत्त्या देव्यादिवाक्यस्यापि ज्ञानाद्देवीमहिषादिषु तादृशवाक्यप्रयोक्तृत्वस्वसम्बोध्यत्वप्रतिसन्धानादेवास्मद्युष्मद्भ्यां देवीमहिषादिप्रतीत्युपपत्ति:।

यदि च तत्र वक्त्रनुवक्तृवाक्ययोर्विभिन्नैवानुपूर्वी तदाऽनुवादकवाक्ये तद्व्यक्तित्वादिना विशेषदर्शनेऽप्यानुपूर्वीप्रकारेण देव्युच्चरितत्वभ्रमादेव श्रोतुर्देव्यादिप्रतीतिस्वीकारेणानुपपत्त्यभावात्। यत्र च तादृशानुपूर्व्यवच्छेदेनापि विशेषदर्शनं तत्र नेष्यत एव तत्प्रतीति:।

एवमन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणरूपं स्वतन्त्रोच्चारणमस्मत्पदप्रवृत्तिनिमि-त्तानुगमकम्। उक्तस्थले ऋष्याद्युच्चारणञ्च न तथा। तस्यार्थप्रतिपादनद्वारा देव्युच्चारणा-धीनत्वादिति नास्मच्छब्दादृष्यादिबोध:। स्वातन्त्र्येणाहं गच्छामीत्युच्चारणस्यापि को गच्छती-

त्यादिप्रशनवाक्यशक्तिग्राहकवाक्योच्चारणाधीनतया स्वार्थपरत्वमुच्चारणविशेषणम्। प्रश्चवाक्यस्य चाहं गच्छामीत्यादिप्रकृतवाक्यतात्पर्यविषयपरत्वाभावात्तदुच्चारणे विशिष्टव्यतिरेक: सुघट:।

आनुपूर्व्या सजातीयं यत् वाक्यान्तरं तदुच्चारणानधीनत्वञ्च निवेशयितुमशक्यम्, शब्दानुकरणस्थल एव समानानुपूर्वीकोच्चारणापेक्षानियमात्। वाक्यार्थानुवादस्थले समानार्थक-वाक्यमात्रोच्चारणापेक्षणात् स्वातन्त्र्यापत्तेर्दुर्वारत्वात्।

वस्तुतस्तु वाक्यान्तरस्थक्रियाकर्मताऽऽपन्नस्वघटितवाक्यार्थप्रत्यायनेच्छानधीनं स्वोच्चारण-मेव स्वतन्त्रोच्चारणम्। अनुवादस्थले चेत्युवाचेति वाक्यान्तरस्थोक्तिक्रियाकर्मतया तदर्थघटित-वाक्यार्थं प्रतिपादयितुमेवानुवादकोऽस्मद्घटितं वाक्यं प्रयुङ्क्त इति न स्वातन्त्र्यम्।

**"मत्पुत्रम्पश्येत्यादौ"** प्रकृतवाक्यस्थज्ञानरूपक्रियाकर्मतया स्वं प्रतिपादयितुमेवास्मद: प्रयोगात् तदुच्चारणस्य स्वातन्त्र्यनिर्वाहाय वाक्यान्तरस्थेति।

**एतेन** यत्र चैत्रेणान्यदीया"**च्चैत्र: सुन्दर**" इत्यादिवाक्यादेव वाक्यार्थं प्रतीत्याहं सुन्दर इति प्रयुज्यते, तत्र स्वसमानार्थकवाक्योच्चारणसापेक्षत्वेऽपि न स्वातन्त्र्यक्षति:।

न वा स्वपाण्डित्याभिमानिमौनिपुरुषज्ञानपरस्यायमहं पण्डित इति जानातीत्यन्यदीयोच्चार-णस्य स्वातन्त्र्यापत्ति:।

अथैवं रीत्याऽव्यवहितोक्तस्थलेऽहंपदेनोच्चारयितृपुरुषविषयकप्रतीतिवारणेऽप्यभिमानिनस्तेन प्रत्ययो दुरुपपाद एव तस्योच्चारणाभावेनास्मदवाच्यत्वादिति, चेत्।

सत्यम्। स्वतन्त्रोच्चारयितु: सर्वत्रास्मदर्थत्वे स्यादेवेयमनुपपत्ति:। तदेव न, स्वतन्त्रोच्चारि-तास्मत्पदस्यैव तद्वाचकत्वात्। निरुक्तस्वतन्त्रोच्चारणरहितस्य चास्मद: स्वघटितवाक्यार्थकर्मक-वाक्यान्तरस्थक्रियाकर्तर्येव शक्ति:।

एवञ्च मया त्वयि हतेऽत्रैवेत्यादौ तादृशक्रिया देव्युवाचेतिवाक्यान्तरस्थोक्तिक्रियैव, तत्कर्तृत्वं देव्या इति पूर्वोक्तभ्रमं विनाऽपि तत्प्रतीतिरुपपादयितुं शक्यते। स्वघटितवाक्यार्थ-कर्मकवाक्यान्तरस्थक्रियात्वञ्च तादृशार्थकर्मकत्वेन वाक्यान्तरप्रतिपाद्यत्वम्। तेनाहं पण्डित

इति विद्वांसं पश्येत्यादौ दर्शनादिक्रियाया अस्मच्छब्दघटितवाक्यार्थविषयकत्वसम्भवेऽपि तेन रूपेण समभिव्याहृतवाक्यान्तराप्रतिपाद्यतया न तत्क्रियाकर्तुरस्मच्छब्दत: प्रतीति:।

अथ इतिपदघटितवाक्यान्तरात् क्रियाप्रतिपत्तावेव तत्कर्तुर्वाक्यान्तरप्रतिपाद्यक्रियाकर्तुत्वं सुग्रहम्। तद्ग्रह एव च तद्घटितानुगमकरूपग्रहेणास्मच्छब्दशक्तिग्रहेऽस्मच्छब्दघटितवाक्यात् वाक्यार्थप्रतीतौ तस्येतिपदादुपस्थित्या वाक्यान्तरात् क्रियाप्रतिपत्तिरित्यन्योन्याश्रय इति चेत्,

न-वाक्यान्तरप्रतिपाद्यतया वक्तृबुद्धिस्थत्वस्यैव क्रियायां विशेषणत्वोपगमात्। प्रतिपत्ते: पूर्वमपि प्रकरणादिना तादृशवक्तृबुद्धेर्ग्रहसम्भवेनान्योन्याश्रयाभावात्।

स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्तृतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्त-द्विषयतावच्छेदकत्वं प्रवृत्तिनिमित्तानुगमकमिति तु सारम्। एवञ्च बुद्धिविषयतावच्छेदकत्वस्य प्रवृत्तिनिमित्तानुगमकत्वप्रवादोऽपि सङ्गच्छते।

उच्चारणकर्तृत्वानुगमकशरीरेऽपि **मिश्राणां** बुद्धिस्थत्वनिवेशबीजन्तु नावधारयाम:।

एवं युष्मत्पदप्रवृत्तिनिमित्तानुगमकगर्भनिविष्टं स्वसम्बोध्यत्वमपि वाक्यान्तरस्थक्रिया-कर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वम्, अनुवादक-पुरुषीयवाक्यार्थकर्मकोक्तिक्रियाघटितमहावाक्यार्थघटकयुष्मदर्थघटितावान्तरवाक्यार्थप्रतीत्याश्रयत्वे नाभिप्रायविषयत्वेऽपि तादृशाभिप्राये तादृशावान्तरवाक्यार्थस्य वाक्यान्तरस्थक्रियाकर्मत्वेन भानात्।

**यदि च** इतिपदघटितवाक्यार्थप्रतीतिरूपफलेच्छाधीना युष्मद्घटितवाक्यार्थप्रतीतिविषयिणी तादृशवाक्यार्थांशे वाक्यान्तरस्थक्रियाकर्मत्वानवगाहिन्यपि तादृशवाक्योच्चारणानुकूला अनुवक्तुरि-च्छा सम्भवतीति तादृशेच्छामादायानुवादकसम्बोध्यस्य सम्बोध्यतापत्तिरिति मन्यते,

**तदा** वाक्यान्तरार्थप्रतीतीच्छानधीनत्वमपीच्छाविशेषणं देयमिति मया त्वयि हतेऽत्रैवेत्यादौ युष्मच्छब्दान्न सुरथादिप्रतीति:।

एवमभ्रान्तस्य ततो महिषादिप्रतीतिनिर्वहाय वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रिया-कर्मण्यपि युष्मदः शक्त्यन्तरं स्वीकार्यम्। तत्र देवी महिषासुरमित्युवाचेतिवाक्यस्थक्रियाकर्मत्वं महिषासुरादेरिति तस्यापि त्वयीत्यादिशब्दार्थतोपपत्तिः।

अत्रापि पूर्ववत् स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्मतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयतावच्छेकत्वेनानुगतानां चैत्रात्मत्वादीनां प्रवृत्तिनिमित्तत्वं बोध्यम्।

सम्बोध्यत्वघटितानुगमकशरीरे च बुद्धिविषयतावच्छेदकत्वनिवेशनं मिश्रोक्तमनुपादेयमेव। सम्बोध्यतावच्छेदके बुद्धिप्रकारकत्वस्याव्यावर्तकत्वात्।

अथ तात्पर्यसत्त्वेऽ**"हमत्रास्मीति मैत्रो जानातीत्यादौ"** चैत्रवाक्यस्थास्मच्छब्दाच्चैत्रोऽपि प्रतीयते। तत्र चैत्रस्य स्वघटितवाक्यार्थकर्मकक्रियाकर्तृत्वाभावात् तदुच्चारणस्य निरुक्तस्वतन्त्र-त्वाभावाच्चानुपपत्तिः।

एवं **"चैत्र! त्वया भुक्तमिति मया श्रुतमित्यादौ"** चैत्रस्य युष्मच्छब्देन प्रत्यायनात्तस्य च वाक्यान्तरस्थक्रियाकर्मान्यत्वात् निरुक्तेच्छाविषयत्वरूपसम्बोध्यत्वस्य चाभावात्तत्कथमुपपद्य-तामिति चेत्,

तर्हि स्वातन्त्र्यमुच्चारणविशेषणं सम्बोध्यत्वघटकेच्छायां निरुक्तेच्छाधीनत्वादिविशेषणं च त्याज्यमेव। मया त्वयीत्यादौ तात्पर्यविरहादेवानुवादकतत्सम्बोध्ययो**"मया त्वयीत्या"**दिनाऽप्रति-पादनोपपत्तेः।

न चैवं बुद्धिविषयतावच्छेदकरूपावच्छिन्न एव युष्मदोऽस्मदश्च शक्तिरास्ताम्। किं सम्बोध्योच्चारयितृतावच्छेदकावच्छिन्ने शक्तिस्वीकारेण, तात्पर्यत एवातिप्रसङ्गभङ्गसम्भवा-दिति वाच्यम्।

तात्पर्यसत्त्वेऽपि चैत्रोच्चरि**"तादहं करोमीत्या"**दिवाक्यात् मैत्रं बोधयितुं प्रयुक्तात्, चैत्रं बोधयितुं प्रयुक्ताच्च **"त्वं गच्छेत्या"**दिवाक्यादुच्चारयितृत्वसम्बोध्यत्वभ्रमं विना मैत्रादिबोध-स्यानुभवविरुद्धत्वात्। अन्यथाऽन्यतात्पर्यण स्वरसतस्तथा प्रयोगापत्तेः।

**इदन्त्ववधातव्यम् - "अयमहं पण्डित इति जानाति"**, **"इत्युवाचेत्या"**दिस्थले सर्वत्र वाक्यार्थस्य कर्मता न सम्भवति। बाधितवाक्यार्थस्थले तदसम्भवात्।

न च बाधितवाक्यार्थस्थले भ्रमरूपैव तत्कर्मत्वप्रतीतिरिति वाच्यम्। विशेषदर्शिनाऽपि भ्रान्तिज्ञेन तथा प्रयोगात्तस्य च वाक्यार्थज्ञानासम्भवेन तदनुपपत्तेः।

न चाहार्यवाक्यार्थज्ञानादेव विनाऽपि विशिष्टवाक्यार्थबुद्धिं विशेषणप्रकारकत्वविशेष्य-विशेष्यकत्वाभ्यां विशिष्टज्ञानज्ञानादेव वा विशेषदर्शी तथा प्रयुङ्क्त इति वाच्यम्। एवमपि विशेषदर्शिनो भ्रान्तिज्ञपुरुषीयतथाविधवाक्याच्छाब्दबोधानुपपत्तेर्वज्रलेपत्वात्।

तस्मात्तत्रेतिपदं न तद्वाक्यप्रतिपाद्यतावच्छेदकीभूततत्तद्धर्मावच्छिन्नपरम्। अपि तु तत्तद्वाक्यजन्यज्ञानसमानाकारकपरम्। तादृशश्चेतिपदार्थोऽभेदसम्बन्धेन यथासम्भवं धात्वर्थे तत्त्वावच्छेदके च ज्ञाने विशेषणमित्येवोपगन्तव्यम्। तथा च सर्वत्रैव युष्मदस्मद्घटितावान्तर-वाक्यस्थल इतिपदं तत्परमेव। तादृशवाक्येन च "**गवित्ययमाहेत्यादौ**" गवादिपदवत् स्वरूपमेवे-तिशब्देन परामर्शार्थमुपस्थाप्यते, न तु युष्मदस्मच्छब्दार्थघटितो वाक्यार्थ इति सम्बोध्योच्चारण-कर्त्रोरिव युष्मदस्मदोः शक्तिः।

त्वं स्थूलः, अहं स्थूलः, त्वं स्वर्गं भोक्ष्यसे, अहं स्वर्गं भोक्ष्य इत्युभयत्रैव युष्मदस्मदोर्मुख्यत्वात् सम्बोध्योच्चारयितृशरीरतादृशात्मनोर्द्वयोरेव युष्मदस्मदर्थत्वं बोध्यम्।

**इति युष्मदस्यत्पदशक्तिविचारः ।।**

## सर्वपदशक्तिविचारः।

सर्वे घटा रूपवन्त इत्यादौ सर्वपदादुद्देश्यतावच्छेदकघटत्वाद्यवच्छिन्नस्याशेषताप्रतीतेर-शेषत्वं सर्वपदार्थः।

नन्वशेषत्वं न विधेयशून्यावृत्तितदुद्देश्यतावच्छेदकवत्त्वम्, केवलान्वयिनो यत्र विधेयता तत्र विधेयशून्यत्वस्याप्रसिद्धेः। यत्र वा विधेयशून्ये उद्देश्यतावच्छेदकीयसम्बन्धविशेषेण वृत्तेरप्र-सिद्धिः; तत्र सर्वे घटा जातिमन्त इत्यादौ गत्यन्तराभावापत्तेश्च, पदान्तरादुपस्थित उद्देश्यता-

वच्छेदकघटत्वादिविशिष्टे सर्वपदोपस्थाप्यविधेयव्याप्तिविशिष्टघटत्वाद्यवच्छिन्नस्य कथञ्चिद-न्वयसम्भवेऽप्यनुभवविरोधाच्च।

घटत्वत्वाद्यनुपस्थितिदशायामपि सर्वे घटा इत्यादिवाक्यादन्वयबोधस्यानुभविकतया व्याप्यत्वेनैव घटत्वादेः सर्वपदार्थत्वस्य स्वीकरणीयतया तज्जन्यव्याप्तिबोधस्य निर्धर्मिता-वच्छेदककतया विपरीतज्ञानाविरोधित्वेनाकिञ्चित्करतापाताच्च।

नापि तदुद्देश्यतावच्छेदकव्यापकतत्तद्विधेयवत्त्वम्, तदवच्छिन्ने विधेयानन्वयप्रसङ्गात्।

नापि विधेयान्वयिव्यापकतापर्यन्तमेव सर्वपदार्थः, नामार्थद्वयस्य भेदान्वयस्याव्युत्पन्न-त्वात्।

नाप्यभेदेन रूपवदाद्यात्मकविधेयान्वयी घटत्वादिव्यापक एव तदर्थः, तथा सति सर्वे वेदाः प्रमाणमित्यादौ सर्वपदस्य प्रमाणपदेनैव सामानाधिकरण्यात् तत्समानलिङ्गवचनत्वापत्तेः। सर्वे घटा वर्तन्त इत्यादौ क्रियारूपविधेये व्यापकस्याभेदान्वये सर्वपदस्य नपुंसकत्वापत्तेः, व्यापकताया भेदान्वयोपगमे नामार्थधात्वर्थयोर्भेदान्वयविरहनियमभङ्गापत्तेः।

**यत्त्व**शेषत्वं न सर्वपदार्थः, उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयोपगमादेव तल्लाभोपपत्तेः। किन्त्वनेकत्वमेव। अनेकत्वञ्च उद्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगि-त्वम्। अत एव सर्वं गगनं शब्दवदित्यादयो न प्रयोगाः।

एवञ्च सर्वे घटा इत्यादौ घटनिष्ठान्योन्याभावप्रतियोग्यभिन्नघटा इत्ययमर्थः प्रतीयते।

न चैवं घटत्वादिसामानाधिकरण्यमात्रेणा विधेयान्वयतात्पर्येण सर्वे घटा नीला इत्यादि-प्रयोगापत्तिः।

सर्वपदार्थविशेषित उद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वयनियमात्। सर्वं प्रमेयमित्यादौ प्रमेयादिविधेयक उद्देश्यवाचकवस्त्वादिपदमध्याहृत्यैव प्रतीतिः। अन्यथोद्देश्यतावच्छेदकीभूतव्या-प्यधर्मानुपस्थित्या तद्व्यापकत्वार्थकत्वेऽप्यनुपपत्तेरिति।

**तदपि न युज्यते** गगनादावपि द्वित्वाद्यवच्छिन्नतद्भेदसत्त्वेन सर्वपदस्यानेकार्थत्वमुपगम्यापि सर्वं गगनमित्यादिप्रयोगस्य दुर्वारत्वात्। तत्तदुद्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य तत्तदुद्देश्यतावच्छेदके सर्वत्र बाधितत्वेन तत्प्रतीतेः दुरुपगमत्वात्।

सामान्यतः प्रतियोगिवृत्त्यन्यत्वस्य वृत्तिमदवृत्तित्वात्। स्वप्रतियोगिवृत्तयो ये ये तद्भेदकूटस्य दुरुपगमतया तद्विशेषणेन द्वित्वाद्यवच्छिन्नभेदव्यावृत्तेरपि हेयत्वात्।

**अस्तु वा** यथाकथञ्चित् तद्व्यावृत्तिः, तथाप्यनेकत्वमात्रस्य सर्वपदार्थत्वेऽवच्छेदकावच्छेदेनान्वयेऽवच्छेदकैकदेशव्यापकतया बोधस्यानुभवविरुद्धतया सर्वे घटा रूपवन्त इत्यादौ घटनिष्ठभेदप्रतियोगिघटत्वस्योद्देश्यतावच्छेदकतया शुद्धघटत्वादिव्यापकत्वभानानुपपत्त्या घटत्व-सामानाधिकरण्येन रूपादिमदन्यत्वनिश्चयदशायां तादृशवाक्याच्छाब्दबोधापत्तिर्दुर्वारैव।

एवं विशेष्यतावच्छेदकव्यापकताया विशेषणसंसर्गांशे संसर्गविशेषणीभूतविशेषणांशे वा भानात् सर्वेषु घटेषु रूपमित्यादौ घटत्वादेर्विशेष्यतानवच्छेदकत्वेन रूपादौ तद्व्यापकत्वभानं दुर्लभमापद्येत।

न च तत्र सप्तम्यर्थाधेयत्वादौ निरूपकत्वसम्बन्धावच्छिन्नव्यापकतासम्बन्धेनैव प्रकृत्यर्थस्य घटादेरन्वयः स्वीक्रियते। घटादेर्विशेष्यता च तादात्म्यसम्बन्धेन। व्यापकता च यादृशरूपावच्छिन्न आधेयत्वादेरन्वयस्तदवच्छिन्ननिष्ठाधेयतात्वसंसर्गावच्छिन्ना। अतो रूपनिष्ठाधेयत्वादेराधेयतात्वादिना द्रव्यादिव्यापकत्वेऽपि नातिप्रसङ्गः। रूपनिष्ठाधेयत्वत्वादिनाऽऽधेयत्वादेःपदानुपस्थितत्वेऽपि न क्षतिः। तथा सत्यपि तादृशस्य संसर्गघटकतया भानेऽविरोधादिति वाच्यम्। उक्तव्यापकतायाः संसर्गत्वे मानाभावात्।

अस्तु वोद्देश्यविधेययोर्विशेष्यविशेषणता। वैपरीत्येऽपि विधेयांश उद्देश्यतावच्छेदकव्यापकत्वस्योद्देश्यविधेयभावमहिम्नैव संसर्गतयैव भानम्।

भवतु चोद्देश्यस्य विशेषणतयोपस्थितस्यापि विधेये पारतन्त्र्येणान्वयो व्यत्पत्त्यविरुद्धः। नामार्थयोरपि पारतन्त्र्येण भेदेनान्वयो मा व्युत्पत्तिं विरौत्सीत्। तथापि सर्वपदस्य यत्र

विधेयवाचकपदसामानाधिकरण्यं तत्र विधेयतावच्छेदकांश उद्देश्यस्य तत्सम्बन्धस्य वाऽनुभवसिद्धो व्याप्तिबोधो दुरुपपाद:।

एवं घटे न सर्वाणि रूपाणि, अपि तु कानिचिदेवेत्यादौ रूपनिष्ठभेदप्रतियोगिरूपत्वावच्छिन्नाभावो घटादौ बाधित एवेत्ययोग्यतापत्ति:।

न च तादृशरूपत्वादिसामानाधिकरण्येन घटादिवृत्तित्वाभाव: प्रतीयते। स चाबाधित एव, नञ्समभिव्याहारस्थलेऽशेषत्वभानानुपगमे क्षतिविरहादिति वाच्यम्। एवं सति तत्र घटस्योद्देश्यत्वानिर्वाहात्। न च तत्र रूपस्योद्देश्यत्वम्। प्रथममनिर्दिष्टत्वात्।

**अत्रोच्यते** - उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिको धर्म: सर्वपदप्रवृत्तिनिमित्तम्। सर्वे घटा इत्यादौ तथाविधधर्म: घटादिनिष्ठयावत्त्वमेव। तस्य व्यासज्यवृत्तितया तत्पर्याप्तेर्घटत्वव्यापकत्वात् रूपादिव्याप्यत्वाच्च। शब्दात् घटत्वादिव्यापकरूपादिव्याप्यत्वलाभे तयोरपि व्याप्यव्यापकभावोऽर्थत: एव लभ्यते। द्रव्यत्वव्यापकपर्याप्ते: रूपाद्यव्याप्यत्वात् सर्वाणि द्रव्याणि रूपवन्तीत्यादावयोग्यता।

उद्देश्यतावच्छेदकव्यापकत्वञ्च तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वम्। तेन रूपादिव्याप्यपर्याप्तेर्द्रव्यत्वादिमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वेऽपि न क्षति:। घटत्वादिव्यापकयावत्वपर्याप्तिश्च न घटादिव्यक्तिभेदात् भिद्यते। अतो न घटत्वादिव्यापकताया अनुपपत्ति:।

विधेयव्याप्यत्वञ्च व्यभिचारित्वसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विधेयतावच्छेदकावच्छिन्नतत्तद्विधेयाभाववत्त्वम्। अतो विधेयतावच्छेदकावच्छिन्नस्य यत्र केवलान्वयित्वं तत्र नाप्रसिद्धि:। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्यैव तथाविधाभावस्य प्रसिद्धत्वात्। अत्रो-द्देश्यताविधेयतावच्छेदकघटत्वरूपत्वादीनामुपलक्षणतयाऽनुगमकं तादृशावच्छेदकत्वमेव। अतो न शक्त्यानन्त्यम्, न वाऽपूर्वधर्मव्या-पकत्वभानानुपपत्ति:।

यद्यपि सामान्यत उद्देश्यतावच्छेदकत्वमव्यावर्तकमेव। उद्देश्यतावच्छेदकविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वञ्च तादृशपदजन्यशाब्दबोधात् प्राक् दुर्ग्रहम्। तथापि तादृशपदप्रति-

पाद्यत्वेन वक्तृबुद्धेर्वक्तृतात्पर्यस्य वा विषयत्वं तथा वाच्यम्। तच्च प्रकरणादिना पूर्वमपि ग्रहीतुं शक्यते। स्वत्वाननुगमः पूर्ववत् समाधेयः।

उद्देश्यविधेयभावश्च न विशेष्यविशेषणभावनियतः। अतः सर्वेषु घटेषु रूपमित्यादावपि घटत्वादिरूपत्वाद्योरुद्देश्यविधेयतावच्छेदकभावोऽक्षत एवेति न घटत्वादिव्यापकरूपत्वावच्छिन्न-व्याप्यपर्याप्तिकयावत्त्वभानानुपपत्तिः।

इयञ्च व्युत्पत्तिरुद्देश्यवाचकपदसमानाधिकरणसर्वपदे। विधेयवाचकपदसमानाधिकरण-सर्वपदस्य च विधेयतावच्छेदकव्यापकोद्देश्यतावच्छेदकावच्छिन्नसम्बन्धव्याप्यपर्याप्तिकयाव-त्त्वमर्ः। अतः काले सर्वे वृत्तिमन्तः, कालः सर्वधर्मवानित्यादौ सर्वपदेन वृत्तिमत्त्वादिव्यापक-कालादिसम्बन्धव्याप्यपर्याप्तिकं यावत्त्वं प्रतीयते।

अथवा स्वार्थान्वयितावच्छेदकधर्मव्यापकताद‍ृशधर्मावच्छिन्नान्वयितावच्छेदकधर्मावच्छिन्न-व्याप्यपर्याप्तिकधर्मावच्छिन्नः सर्वपदार्थ इत्युद्देश्यविधेयभावं विशिष्यानिवेश्य सर्वसाधारणैक-व्युत्पत्तिः स्वीक्रियते।

अन्वयित्वञ्च विशेष्यविशेषणसाधारणम्। सर्वं प्रमेयमित्यादौ वस्त्वादिपदाध्याहारमन्तरेण बोधोपगमे तदनुरोधेनान्योन्याभावप्रतियोगितानवच्छेदकविधेयव्याप्यपर्याप्तिकयावत्त्वार्थकताऽपि सर्वपदस्य स्वीकार्या।

अयं सर्वं घटं वेत्तीत्यादावेतदीयज्ञानविषयत्ववत्वादिना विषयतानन्वयात् ताद‍ृशधर्मो नान्वयितावच्छेदकः। अन्वयितावच्छेदकविषयत्ववत्वाद्यवच्छिन्नव्याप्यत्वमतिप्रसञ्जकमिति तत्रापि व्युत्पत्त्यन्तरं स्वयमूहनीयम्।

अत्र न सर्वाणि रूपाणीत्यादौ नञर्थप्रतियोगिविशेषणार्थकसर्वपदस्य स्वार्थान्वयितावच्छेदक-रूपत्वादिव्यापकपर्याप्तिनिरूपकयावत्त्वार्थकतया तदवच्छिन्नाभाव एव प्रतीयते। व्यासज्यवृत्ति-धर्मावच्छिन्नप्रतियोगिताकस्ताद‍ृशाभावो घटादावबाधित एवेति नायोग्यता।

न चाव्यासज्यवृत्तिगुणत्वादिपर्याप्तेरपि रूपत्वादिव्यापकतया गुणत्वादिसाधारणरूपत्वा-दिव्यापकपर्याप्तिकधर्मावच्छिन्नाभावो न घटादाविति कथमत्र योग्यतेति वाच्यम्।

अव्यासज्यवृत्तिगुणत्वादेरेकैकवृत्तिधर्मावच्छिन्नपर्याप्तिकूटस्यैव सर्वाणि रूपाणि गुणा इति प्रतीत्याऽवगाहनात्। सर्वसाधारणैकपर्याप्तौ मानाभावात्। प्रत्येकवृत्तिधर्मावच्छिन्नपर्याप्तिषु रूपत्वादेर्निरुक्तव्यापकत्वाभावात् । सर्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकयावत्त्वसामानाधिकरण्यमभावस्य प्रतीयते। अतो नायोग्यता।

अनुयोगिविशेषणावच्छेदेनैव नञाऽभाव: प्रत्याय्यते, द्रव्यं न रूपवदित्यादिप्रयोगादर्शनादिति कथमेतदुपपद्यतामिति तु नाऽऽशङ्कनीयम्।

व्यासज्यवृत्तिधर्माविशेषितानुयोगिकाभावबोधे तथा नियमोपगमात्।

**यत्तु** स्वरूपसम्बन्धात्मकमभावानुयोगितावच्छेदकत्वमनुयोगिविशेषणे नञ्पदजन्याभावप्रतीत्या गृह्यते। द्रव्यत्वादौ न तादृशं रूपवद्भेदाद्यनुयोगितावच्छेदकत्वम्। अतो न द्रव्यं न रूपवदित्यादय: प्रयोगा:। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावाभ्युपगमेन च सर्वं द्रव्यं न रूपवदित्यादिप्रयोगा उपपादनीया:।

न च व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावाभ्युपगमे कस्यापि रूपादे: सर्वघटादिपर्याप्तिर्नास्तीति सर्वघटत्वाद्यवच्छिन्नेऽपि रूपादिमद्भेदसत्त्वेन सर्वे घटा न रूपवन्त इत्यादिप्रयोगापत्तिरिति वाच्यम्।

रूपादिपर्याप्तित्वेनानुगतपर्याप्तीनामनतिप्रसक्तेन घटादिनिष्ठयावत्त्वादिनाऽप्यवच्छेदात् तदवच्छेदेन रूपादिमद्भेदवृत्तौ विरोधात्। द्रव्यत्वादिव्यापकयावत्त्वस्य चातिप्रसक्ततया रूपादिपर्याप्तित्वावच्छिन्नानामप्यनवच्छेदकतया तदवच्छेदेन रूपादिमद्भेदवृत्तावविरोधादिति।

**तदसत्** - उक्तरीत्योपपत्तौ प्रतियोगितावच्छेदकादिमति तच्छून्यसाधारणव्यासज्यवृत्तिधर्मावच्छेदेनान्योन्याभावादिवृत्तौ मानाभावात्। तादृशाभावोपगमे प्रतिबन्धकसमवहितेऽपि देशे व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकप्रतिबन्धकाभावबलात् कार्यापत्ते:। तत्र कारणतावच्छेदककोटौ विशेषणान्तरं प्रक्षिप्यापत्तिवारणे तु गौरवात्।

अथ सर्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकपर्याप्तौ विधेयीभूतरूपवद्भेदव्याप्यत्वस्य बाधितत्वादयोग्यत्वं दुर्वारमेवेति चेत्,

न-तत्र विधेयव्याप्यत्वभानानुपगमात्। खण्डशो विभिन्नशक्त्युपगमेन क्वचित्तदंशपरित्यागे विरोधविरहात्।

सर्वं गगनमित्यादिप्रयोगाभावात् यावत्त्ववदनेकत्वमपि सर्वपदार्थ:। तच्च स्वार्थाभेदान्वयो-द्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगित्वमेव। भेदश्च सामानाधिकरण्यनिरूपकत्वोभय-सम्बन्धेन प्रतियोगिताविशिष्टान्यो ग्राह्य:। नातो द्वित्वाद्यवच्छिन्नभेदमादायातिप्रसङ्ग:।

एतादृशोभयधर्मावच्छिन्ने शक्तिरेकैव। अतो नैकधर्मं परित्यज्यापरमादाय बोध: कदाचिदपीति न कतिपयानेकतात्पर्येणाशेषैकतात्पर्येण वा सर्वपदं प्रयुज्यते।

चैत्रो दधि भुङ्क्ते, मैत्र: पयो भुङ्क्ते, देवदत्तो घृतं भुङ्क्ते, विष्णुमित्र: सर्वमेवेत्यादौ सर्वपदेन प्रत्येकं दधिपयोघृतानां भोजनकर्मतया प्रतिपादनात्, यद्रूपावच्छिन्ने पदान्तरोपस्थाप्यार्थे स्वार्थान्वय:, तद्रूपावच्छिन्नान्विततया यद्यद्धर्मावच्छिन्ना उपक्रान्ता: प्रत्येकं तावद्धर्मावच्छिन्नेषु सर्वपदस्य शक्त्यन्तरमङ्गीकार्यम्। उपक्रान्तैकधर्मावच्छिन्नान्वययोग्यताविरहे वाक्यस्याप्रा-माण्यात्तादृशस्थले तथाविधसकलधर्माणामेवान्वयितावच्छेदकतया भाननियम:।

तन्निर्वाहिका च तथाविधयावद्धर्मप्रकारकं बोधं जनयतु सर्वपदमित्याकारकसङ्केतरूपा विलक्षणशक्तिरेव। तादृशशक्तिज्ञानेनैकधर्मप्रकारकबोधजननेऽपरापरतथाविधधर्मप्रकारकबोधसाम-ग्र्या: पुष्पवन्तपदशक्तिज्ञानेन चन्द्रत्वसूर्यत्वयोरेकतरप्रकारकबोधजननेऽपरप्रकारकबोधसामग्र्या इव प्रयोजकत्वोपगमात्।

न च प्रक्रान्तानां दध्यादीनां प्रत्येकमन्वये वाक्यभेदापत्त्या साहित्यप्रकारेण तावत्पदार्थ-वाचकत्वमेव सर्वपदस्य किन्नोपेयत इति वाच्यम्।

साहित्यविशिष्टान्वयस्य समभिव्याहृतपदार्थे यत्र बाधस्तत्रापि तथा प्रयोगात्। वाक्यभेदस्य गत्यन्तरविरहेणेष्टत्वात्। अत एव प्रत्येकं पुत्रपश्वादिरूपफलकामकर्तव्यतया यज्ञक्रतूनमि-धायाभिहितेन सर्वेभ्यो दर्शपूर्णमासावित्यनेन मिलितानां तावत्फलानां दर्शपूणमासकर्तव्यता-प्रयोजककामनाविषयत्वं न प्रतिपाद्यते। प्रकृतवाचिना सर्वनामपदेन मिलितत्वेन

फलानुपस्थापनात्। अपि तु प्रत्येकमेवेति प्रत्येकफलकामस्यैव तत्राधिकार इति **योगसिद्ध्यधिकरणसिद्धान्तोऽपि** सङ्गच्छते।

**इति सर्वपदशक्तिविचारः ।।**

**किंपदशक्तिविचारः।**

किम्पदस्य जिज्ञासिते शक्ति:। अत एव स्वीयजिज्ञासाज्ञापनाय किंपदघटितं प्रश्नवाक्यं प्रयुज्यते।

तत्रोद्देश्यवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरू-पितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितो धर्म: प्रवृत्तिनिमित्तम्। उपस्थाप्यतावच्छेदकत्वान्तमुप-लक्षणतयाऽनुगमकम्, शाब्दबोधे तदभानात्।

एवञ्च क: पचतीत्यादित: पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेकत्वेन वक्तृजिज्ञासितो यो धर्मस्तद्वान् पचतीत्याकारकोऽन्वयबोध:। किञ्चिद्धर्मावच्छिन्नोद्देश्यकपाक-कर्तृत्वविधेयकज्ञानं भवत्वित्याकारकजिज्ञासायास्तादृशबोधविषयकतया तादृशेच्छाविषयीभूतज्ञान-जनकात् ब्राह्मण: पचतीत्युत्तरवाक्यात्तन्निवृत्तिरिति तादृशप्रश्नानन्तरं तथैवोत्तरं प्रयुज्यते।

न चैवं प्रमेय:पचतीत्युत्तरवाक्यमेव न कथं तादृशप्रश्नानन्तरं प्रयुज्यते, तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यम्।

जिज्ञासाविषयीभूतविधेयन्यूनवृत्तिधर्मावच्छिन्न एव तादृशकिंपदस्य शक्त्युपगमात्। अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिंपदशक्यतावच्छेदकगर्भे च स्वार्थाभेदान्वयिता-वच्छेदकत्वोपलक्षिधर्मन्यूनवृत्तित्वमपि धर्मांशे विशेषणं देयम्। अत: को ब्राह्मण: पचतीत्यादि-प्रश्नानन्तरं चैत्र: पचतीत्याद्याकारकमुत्तरवाक्यं प्रयुज्यते। न तु मनुष्य: पचतीत्यादिकम्, मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात्, तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयकेच्छायास्तत्रा-प्रतीते:।

एवं यत्रोद्देश्यतावच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तदन्वयितावच्छेदकावच्छिन्ने विशेषणतापन्नतदन्वयितावच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतविधेयज्ञान गोचरेच्छा किंपदेन बोध्यते। अत: कति घटा: सन्तीत्यादौ डतिप्रत्ययार्थसंख्यादौ किंपदार्थस्य जिज्ञासितधर्मावच्छिन्नस्याभेदेनान्वयात्, संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यतावच्छेद-कताकबोधजनकं दशत्वसंख्यका घटा: सन्तीत्याद्युत्तरं प्रयुज्यते।

यत्र चोद्देश्यतावच्छेदकीभूतविभक्त्याद्यर्थे भेदेन किंपदार्थान्वय: कस्य पुत्र: सुन्दर: इत्यादौ, तत्र यादृशसम्बन्धेन यदवच्छिन्ने तदन्वयस्तत्र तादृशसम्बन्धेन विशेषधर्मावच्छिन्नविशेषित-तदवच्छिन्ननिष्ठोद्देश्यतावच्छेदकताकप्रकृतविधेयज्ञानगोरेच्छा प्रतीयते।

एवं विधेयवाचककिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्मावच्छि-न्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो यो विशेषधर्मस्तदवच्छिन्ने शक्ति:।

अयं क: इत्यादाविदन्त्वावच्छिन्नांशे विधेयतावच्छेदकत्वेन जिज्ञासितधर्मवानित्याकारको बोध:। तेन तद्विषयकजिज्ञासाविषयीभूतज्ञानजनकञ्चायं ब्राह्मण इत्याद्युत्तरवाक्यं तादृश-प्रश्नानन्तरं प्रयुज्यते।

एवं यत्र विधेये विधेयतावच्छेदके वा किंपदार्थस्याभेदेन भेदेन वाऽन्वय:, इदं किं द्रव्यम्, किं धनम्, भवत: पुत्रा: कति, भवान् कस्य पुत्र: इत्यादौ, तत्र रीति: पूर्ववदूहनीया।

**किमिन्दु: किं पद्म्मित्यादौ** चाव्ययकिमो वाशब्दस्येव वितर्कोऽर्थ:। वितर्कश्च प्रयोक्तु: सम्भावनात्मकज्ञानम्। तदर्थस्य च विशेष्यतासम्बन्धेन प्रथमान्तपदोपस्थाप्ये विशेष्ये प्रकारितासम्बन्धेन, तत्र च विशेषणस्य चन्द्रादेरन्वय:, नामार्थेनाव्ययार्थस्य भेदान्वयेऽविरोधात्।

कुत्सासार्थकमपि क्वचित् किंपदम्, यथा किं गौरित्यादौ।

यत्र विशेषणवाचकपदमपि प्रथमान्तं तत्राभेदसम्बन्धावच्छिन्नप्रकारिता संसर्ग:। यत्र च प्रकृत्यर्थविशेष्यतया स्वार्थबोधकविभक्त्यन्तं विशेषणपदम्, तत्र किंपदासत्त्वे तादृशविभक्त्य-न्तसमुदायार्थस्य विशेष्ये यादृशसम्बन्धेनान्वयस्तादृशसंसर्गावच्छिन्नप्रकारितैव तादृशार्थस्य

किंपदार्थे संसर्गः। अतः किमिन्दुरित्यादावभेदेन चन्द्रादिप्रकारिका, धनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वत्वादिप्रकारिका सम्भावना नियमतः प्रतीयते। किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिसाधर्म्यप्रतीतिस्त्वर्थादिति।

**इति किंपदशक्तिविचारः ।।**

**यत्पदशक्तिविचारः।**

तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः। अत एव यत्पदेनार्थप्रत्यायने नियमतस्तत्पदापेक्षा। तत्पदसमभिव्याहारज्ञानं विनोक्तानुगमक-धर्माग्रहेण शक्तिपरिच्छेदस्यैवासम्भवात्। तच्छब्दजन्यप्रतिपत्तिपूर्वमपि तत्प्रतिपाद्यतया वक्तुरभिसन्धिः प्रकरणादिना सुग्रह इति न तच्छब्दजन्यप्रतीतेर्यत्पदशक्तिग्रहेऽपेक्षा।

इयञ्च व्युत्पत्तिः प्रक्रम्यमाणपरामर्शकयच्छब्दस्य। चैत्रः समागतो यस्तत्रावलोकित इत्यादौ चैत्रादिपदेनाप्युपस्थापितस्य तस्य यच्छब्देन बोधनात्। अत एव-

**"साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके"**

इत्यादौ तत्पदासत्त्वेऽपि न दोषः। पूर्वप्रक्रान्तस्य कृतपदोपस्थाप्यव्यापारस्यैवाभेदेन मीलनान्वयितया यच्छब्देन बोधनात्।

एवं **"यं सर्वशैला"** इत्यादावपि तदनुरोधेन पूर्वप्रयुक्तपदोपस्थापितेऽपि तस्य शक्त्यन्तरं स्वीकरणीयम्। अतिप्रसङ्गश्च स्वप्रयोजकबुद्धिस्थत्वमन्तर्भाव्यैव वारणीयः।

**इति यत् पदशक्तिविचारः ।।**

**तत्पदशक्तिविचारः।**

एवं यत्पदोपस्थाप्ये तत्पदशक्तिर्बोध्या। अत एव प्रक्रम्यमाणवाचकतच्छब्देनापि नियमतो यत्पदमपेक्ष्यते। तमानय य इहास्तीत्यादाविव। तमानय घट इहास्तीत्यादितो घटानयनादि-प्रतीतेरनुभवविरुद्धत्वात्। प्रक्रान्तपरामर्शकस्य च न तदपेक्षानियमः, **"तदन्वये शुद्धिमती"** त्यादौ

वैवस्वतादिपदोपस्थाप्यस्यापि तच्छब्देन परामर्शात्। तदनुरोधेन च तच्छब्दस्यापि पूर्ववत् पूर्वप्रयुक्तपदोपस्थापिते शक्त्यन्तरमङ्गीकार्यम्।

उपस्थितिश्च स्वविशेष्यकवृत्तिज्ञानाधीना ग्राह्या। अतः पशुरस्ति तं पश्येत्यादौ पश्वादिपदोपस्थाप्यतत्तल्लोमादीनां तदादिशब्देन न परामर्शः।

प्रसिद्धार्थकमपि तत्पदम्, यथा - **"कला च सा कान्तिमती"**त्यादौ।

**इति तत्पदशक्तिविचारः ।।**

**इदमेतत्पदशक्तिविचारः।**

**इदमेतदोः प्रत्यक्षबुद्धिविषये ।**

**अहम् पदशक्तिविचारः।**

**इति अदम्पदशक्तिविचारः।।**

**अदसश्च परोक्षविषये शक्तिः।**

**स्वशब्दश्क्तिविचारः।**

स्वशब्दस्य समभिव्याहृतपदोपस्थाप्ये शक्तिः। समभिव्याहृतत्वन्त्वेकवाक्यघटकत्वम्।

अथैवं **"चैत्रः स्वपुत्रं पश्यती"**त्यादाविव **"स्वं चैत्रपुत्रः पश्यति", "चैत्रभ्राता वा स्वपुत्रं पश्यती"**त्यादौ न कथं स्वशब्देन चैत्रः प्रत्याय्यते। मुख्यविशेष्यवाचकताव्युत्पत्त्यभ्युपगमे स्वपुत्रदर्शिनं चैत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधानुपपत्तिः।

न चावान्तरवाक्यार्थबोधे चैत्रस्य मुख्यविशेष्यतया नेयमनुपपत्तिरिति वाच्यम्। अन्तराऽवान्तरवाक्यार्थबोधमन्तरेणाहत्यैव विशेष्ये विशेषणमिति रीत्या महावाक्यार्थबोधे यत्र तात्पर्यं तत्रैव तदनुपपत्तेर्दुर्वारत्वात्।

न च स्वार्थस्य साक्षात् परम्परया वा यदर्थे विशेषणत्वं तादृशार्थवाचकताव्युत्पत्तेर्नायं दोष इति वाच्यम्। एवमपि "स्वपुत्रश्चैत्रेण दृश्यत" इत्यादौ चैत्रपुत्रबोधानुपपत्तेः। स्वसमभिव्याहृत-क्रियान्वयिवाचकत्वमपि न विचारं सहते। परम्परया क्रियान्वयित्वस्य चैत्रभ्राता स्वं

पश्यतीत्यादौ चैत्रादिसाधारणत्वात्। साक्षात्क्रियान्वयित्वस्य चैत्र: स्वं पश्यतीत्यादावप्यभावात्। तत्र विभक्त्यर्थद्वारैव नामार्थधात्वर्थयोर्भेदान्वयस्य व्युत्पन्नत्वात्।

क्रियान्वयिप्रत्ययार्थे साक्षादन्वयित्वविवक्षणान्न दोष इति चेत्, एवमपि स्वव्यापकवह्नि-समानाधिकरणधूमवान् पर्वत इत्यादौ स्वशब्देन धूमादिपरामर्शानुपपत्तिवारणमशक्यमेव। एवं चैत्रेणानीतं स्वपुत्रं मैत्र: पश्यतीत्यादौ चैत्रपुत्रबोधापत्तिवारणमपि।

न च स्वपदार्थो यदर्थघटितविशेषणस्य विशेष्यतावच्छेदककोटौ यदर्थस्य विशेषणकोटौ वा निविशते, स एव पदार्थ: स्वशब्दवाच्य:। चैत्रपुत्र: स्वं पश्यतीत्यादौ चैत्रस्य भ्राता स्वपुत्रं पश्यतीत्यादौ च स्वपदार्थश्चैत्रस्य विशेषणकोटौ चैत्रघटितार्थस्य धर्मितावच्छेदककोटौ वा न निविशत इति नातिप्रसङ्ग:। चैत्रावलोकितं स्वपुत्रं मैत्र: पश्यतीत्यादौ चैत्रपदस्य चैत्रकर्तृके लक्षणया चैत्र: पदार्थैकदेश:, न तु पदार्थ इति स्वशब्दान्न तत्प्रतीति:। चैत्रेणावलोकितमित्यादौ तु तात्पर्यसत्त्व इष्यत एव ततस्तत्प्रतीति:। स्वपुत्रदर्शिचैत्रधनमित्यादौ चैत्रपुत्रदर्शिचैत्रसम्बन्धि-त्वाद्यवच्छिन्ने चैत्रान्तस्य, वाक्ये लक्षणाविरहे पूर्वभागं परित्यज्य तादृशलक्ष्यार्थपरस्य केवलचैत्रादिपदस्यैव वा तत्र लक्षणया तत एव चैत्रपुत्रादिप्रतीत्युपपत्तिरिति वाच्यम्।

एवं सति चैत्रस्य भ्रात्रा स्वपुत्रो दृश्यत इत्यादौ स्वपदेन चैत्रप्रतीत्यापत्तेर्दुर्वारत्वात्।

**मैवम्** - साक्षात् परम्परया वा य: स्वार्थस्य विशेष्य:, यश्च समभिव्याहृतक्रियाकारक-पदार्थस्तदुभयत्रैव स्वपदस्य शक्ति:। स्वव्यापकवह्निसामानाधिकरण्यं धूम इत्यादावस्तीति-क्रियाध्याहारात् धूमस्य समभिव्याहृतक्रियाकारकत्वमक्षतमेवेति न स्वपदात्तत्प्रतीत्यनुपपत्ति:।

एवं **"कलशे निजहेतुदण्डज: किमु चक्रभ्रमकारिता गुण"** इत्यादावपि क्रियाध्याहारात् स्वपर्यायनिजपदात् कलशादिप्रतीति:। स्वव्यापकवह्निसामानाधिकरण्यं धूमस्येत्यादयश्च न प्रयोगा:।

**इदन्तु चिन्त्यते** - यद्रूपेण समभिव्याहृतपदादुपस्थितिस्तद्रूपावच्छिन्नस्य स्वपदार्थत्वे एकेन ब्राह्मणेन ब्राह्मणान्तरपुत्रदर्शनदशायां ब्राह्मण: स्वपुत्रं न पश्यतीत्यादिप्रयोगानुपपत्ति:। अन्वयितावच्छेदकावच्छिन्नाभावस्य विशेष्ये बाधात्। समभिव्याहृतपदार्थनिष्ठतत्तद्व्यक्तित्वा-

वच्छिन्नस्य तदर्थत्वेऽपि वह्निकालीनद्रव्यवति ह्रदादौ स्वाव्यापकवह्निकालीनद्रव्यं नास्तीति प्रयोगानुपपत्तिः। तत्र द्रव्यपदस्यापि लक्षणया तत्तद्व्यक्तित्वावच्छिन्नपरत्वे महानसादावपि तथा प्रयोगा-पत्तिः। तथाविधयत्किञ्चिद्व्यक्त्यभावस्य तत्राबाधात्। तादृशसमभिव्याहृतस्थले यद्यद्व्यक्तिव्यापकता वह्नेस्तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एव नियमतः प्रतीयत इति चेत्,

न-तथाविधसकलव्यक्तिनिष्ठतत्तद्व्यक्तित्वानां युगसहस्रेणापि ज्ञातुमशक्यत्वा-त्। कदाचित् कस्यचित् ज्ञानसम्भवेऽपि कतिपयतत्तद्व्यक्तित्वमात्रोपस्थितिदशायां कतिपयाभाव-मात्रगोचरप्रतीतेरप्यङ्गीकार्यतया तादृशनियमस्य सुदूरपराहतत्वादिति,

**अत्र केचित्** - ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदं ब्राह्मणत्वावच्छिन्नार्थकमेव। विशेष्यीभूतब्राह्मणत्वाद्यवच्छिन्ने च स्वपदार्थघटितस्य ब्राह्मणपुत्रदर्शनकर्तृत्वादिरूपविशेषणस्य न केवलस्याश्रयत्वादिसम्बन्धेनान्वयः, अपि त्वाश्रयत्वस्वनिरूपकदर्शनविषयपुत्रजनकत्वोभय-सम्बन्धेनैव। एवञ्च तत्र नञा तादृशोभयसम्बन्धावच्छिन्नतदभाव एव प्रत्याय्यते। अतो नोक्तदोष इति **वदन्ति।**

**इति स्वपदशक्तिविचारः ।।**

## एकपदशक्तिविचारः ।

एक शब्दस्य कैवल्यादिविशिष्टे शक्तिः। कैवल्यञ्च स्वसजातीयद्वितीयराहित्यम्। तच्च स्वसजातीयनिष्ठभेदाप्रतियोगित्वम्। स्वसजातीयत्वञ्च उद्देश्यविशेष्यवाचकैकशब्दात् कैवल्यघट-कत्वेन प्रकृतविधेयवत्त्वरूपं प्रतीयते। तथा चात्रायमेको भुङ्क्त इत्यादावेतद्देशाधिकरण-कभोजनकर्तृनिष्ठभेदाप्रतियोग्ययमत्र भुङ्क्त इत्याद्याकारकबोधः। शक्यतावच्छेदकानुगमश्चोक्त-दिशा चिन्तनीयः।

अयं फलमेकं भुङ्क्ते, फलमेकं भुञ्जानस्तिष्ठतीत्यादौ विधेयत्वाद्यवच्छेदकको-टिप्रविष्टार्थैकपदाच्च यादृशार्थविशेषणतापन्ने यदवच्छिन्ने स्वार्थान्वयिनो विशेषणत्वं तादृशार्था-नुयोगिकान्वयप्रतियोगित्वविशिष्टतद्रूपावच्छिन्नान्वयप्रतियोगित्वरूपसाजात्यं प्रतीयते। अतस्तत्रैत-

त्कर्तृकभोजनादिनिष्ठसंसर्गप्रतियोगिकर्मत्वादिनिष्ठसंसर्गप्रतियोगिनिष्ठभेदाप्रतियोगित्वं फलादौ प्रतीयते।

एकसमानार्थकमात्रादिपदस्थलेऽप्येतादृशी रीतिरिति कृतं पल्लवितेन।

**इति एकपदशक्तिविचारः ।।**

## इति विशेषकाण्डः।

## परिशिष्टकाण्डः।

गवादिशब्दात् संस्थानरूपाकृतेरपि बोधस्यानुभविकतया गोत्वादिजातिवत् साऽपि तद्वाच्ये विशेषणम्। तस्याश्च वाच्यविशेषणत्वेऽपि न प्रवृत्तिनिमित्तता। साक्षात्सम्बन्धेन वाच्यवृत्तित्वाभावात्। अवयवसंयोगरूपायास्तस्या: सामानाधिकरण्येनैव गवादौ सत्त्वात्। अत्र शक्त्या जात्याकृत्योरेकतरविनिर्मोकेणापरभानविरहात् लाघवाच्चोभयविशिष्टे गवादिपदस्यैकैव शक्ति: स्वीक्रियते। शक्यविशेषणभेदेऽपि पुष्पवन्तादिपदवत् धेन्वादिपदवच्च शक्त्यैक्यस्य दुरपवादत्वात्।

एकविशिष्टापरावच्छिन्ने शक्तिरिति तु न सत्। विशेष्यविशेषणभावे विनिगमनाविरहात्, गवाद्यंशे साक्षादुभयप्रकारकबोधस्यानुभवसिद्धस्य दुरुपपादत्वाच्च। यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्यं, यथा पिष्टकमय्यो गाव इत्यादौ, तत्र शुद्धगोत्वाद्यवच्छिन्नपरे धेन्वादिपद इव लक्षणैव। जात्याकृतिविशिष्टायां व्यक्तौ शक्तेरैक्यं **"जात्याकृतिव्यक्तयस्तु पदार्थ"** इति न्यायसूत्रे बहुवचनमुपेक्ष्य पदार्थ इत्येकवचनान्तं निर्दिष्टवतो **महर्षेर**प्यनुमतम्।

**मीमांसकास्तु** गवादिपदानां जातिरेव वाच्या, न तु व्यक्तिराकृतिर्वा। व्यक्तिशक्तिमतेऽपि स्वरूपतस्तस्याः ग्रहासम्भवेन शक्तिज्ञानप्रकारीभूतायां जातौ शक्तेस्तदवच्छेदकताया वाऽवश्यकल्पनीयतया व्यक्त्यादौ तत्कल्पनायां गौरवात्। प्रयोजनविरहाच्च।

व्यक्तिशक्तिमते च जातेरुपलक्षणत्वासम्भव: प्रागेव दर्शित:। यथा व्यक्तिशक्तिमते जात्यंशे शक्तिस्तदवच्छेदकता वा तद्विशेषणानवच्छिन्नैव तथा जातिशक्तिमतेऽपि सा तथैवेति न गोत्वत्वादिप्रवेशात् गौरवशङ्काऽपि। न हि जातिशक्तिमतेऽपि शाब्दबोधे सा किञ्चिद्धर्मप्रकारेण भासते, येन प्रकारलाभार्थं प्रकारविशेषमन्तर्भाव्य शक्ति: कल्पनीया। अपि तु स्वरूपत एव।

अथानुमानादिना गोत्वादौ शक्तिग्रहो भवन् धर्मितावच्छेदकविधया गोत्वत्वादिकमवश्यं विषयीकरोति। निर्धर्मितावच्छेदकज्ञानस्यानुमानादिनाऽजननात् तादृशज्ञानस्य विपरीतज्ञानाविरोधितयाऽनुपयुक्तत्वाच्च। एवञ्च तादृशधर्मस्य शक्यतावच्छेदकत्वं दुर्वारमेव। शक्तिग्राहकमानेन धर्मितावच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावात्।

यदि चावच्छेदकताग्रहेऽपि शक्तिधियस्तदंशे भ्रमत्वं कल्प्यते, विषयबाधेनावच्छेदकत्वमेव शक्तिग्राहकमानेन न गृह्यत इत्येव वा स्वीक्रियते, तदा प्रतियोगित्वकारणत्वादीनामपि तुल्ययुक्त्याऽवच्छेदकत्वविलयप्रसङ्ग:, तत्राप्येवं सुवचत्वात्।

प्रतियोगित्वादिबुद्धेरवच्छेदकत्वावगाहित्वमनुभवसिद्धं यदि, तदा शक्तिधियस्तदवगाहिता न तथेति वचसि को वा श्रद्दधाति, विशेषाभावात्। मा भूद्वा गोत्वत्वादिकमवच्छेदकं शक्तेस्तथाऽपि शक्तिज्ञानकारणतायां गुरुशरीरगोत्वत्वादेर्धर्मितावच्छेदकतात्मकविषयतानिवेशात् गौरवं दुर्वारमेव। व्यक्तिशक्तिवादिनान्तु स्वरूपतो गोत्वादिनिष्ठधर्मितावच्छेदकत्वस्यैव निवेशादिति चेत्,

न-पदविशेषणताऽऽपन्नशक्तौ निरूपितत्वसम्बन्धेन, शक्तिसम्बन्धेन पदे वा स्वरूपतो गोत्वादिप्रकारिकाया एव शक्तिधिय: स्वीकारात्। न हि समवायेनैव जाते: स्वरूपत प्रकारतेति नियम: प्रामाणिक:। घटं जानामीत्यादौ प्रकारितासम्बन्धेन स्वरूपतो घटत्वादीनां ज्ञानाद्यंशे प्रकारत्वोपगमात्। समवायेन धर्मिविशेषणताऽऽपन्नस्यैव सम्बन्धान्तरेणाप्यत्र स्वरूपतो भानमित्यपि न नियम:। प्रामाण्यस्य परतो ग्राह्यतामते अयं घट इत्याकारकस्य स्वरूपतो

घटत्वादिज्ञानस्यानुव्यवसाये प्रकारितायां तत्सम्बन्धेन ज्ञाने वा धर्मिविशेषणतानापन्नस्य घटत्वादेर्भानात्।

अस्तु वा प्रकृतेऽपि गवादिविशेषणताऽऽपन्नस्यैव गोत्वादे: शक्तौ निरूपितत्वसम्बन्धेन, पदे वा शक्तिसम्बन्धेन स्वरूपत: प्रकारता। गवादेश्च शक्तौ पदे वा स्वसमवेतनिरूपितत्वस्व-समवेतवाचकत्वरूपपरम्परासम्बन्धेन प्रकारता। तादृशी च गवादिविषयता न शाब्दबोधजनकता-वच्छेदिकेति परम्परासम्बन्धेन प्रकारताया जनकतावच्छेदकत्वापेक्षया साक्षात्सम्बन्धावच्छिन्न-प्रकारतायास्तथात्वे लाघवेन व्यक्तिशक्तिसिद्धेर्नावकाश:।

अथ जातिशक्तिमतेऽपि शाब्दबोधे व्यक्तिभानमावश्यकम्। गौर्नष्टा, गौर्जाता, गामानयेत्यादौ समभिव्याहृतपदार्थान्वयस्य जातौ बाधात्। परम्परासम्बन्धेन तदन्वयोपगमेऽप्यन्वयिता-वच्छेदकतया गोत्वत्वादिभानापत्ते:। शक्तौ गोत्वत्वाद्यन्तर्भावापत्तेश्च। न हि स्वरूपेण पदार्थस्य पदार्थान्तरान्वयितया भानं कैश्चित् स्वीक्रियते। स्वीकुरु वा प्रकारतया स्वरूपेणोप-स्थितजातेर्भानम्। विशेष्यतया तद्भानन्तु न सम्भवत्येव। निर्धर्मतावच्छेदककस्य शाब्दबोधस्य प्रवृत्त्याद्यनुपयो-गितया तत्स्वीकारासम्भवात्।

एवञ्च जातिमात्रवाचकत्वेनाभ्युपगतपदस्यापि व्यक्तिबोधजनकतायामविवादात्व्यक्तिशक्ति-र्ध्रुवैव। शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यतद्बोधजनकताया एव तच्छक्तिसाधकत्वात्। अन्यथा जातावपि शक्त्यसिद्धिप्रसङ्गात्।

एवं शक्तेरीश्वरसङ्केतरूपत्वे व्यक्तिबोधकताया: पदेऽबाधितत्वेनेश्वरेच्छाविषयतया तस्या अपि शक्यत्वं दुरपहनवम्। न हि मीमांसकैर्भगवान्नानुमन्यत इत्येतावतैव तादृशशक्त्यनवकाश:, तत्साधकबहुतरमानसत्त्वेन तदुपन्यासस्यापि निरुत्तरत्वापातात्।

एवं ज्ञाने पदानां शक्तिरित्येतादृशमतेऽपि व्यक्तिज्ञानजननसमर्थपदस्य जाताविव व्यक्तावपि वाच्यत्वं दुरपन्हवमेव शक्तिनिरूपकज्ञानविषयत्वरूपस्य तस्याप्यविशेषेण जातिव्यक्त्यो: सत्त्वादिति चेत्,

न-व्यक्तिशक्तावस्माकं न वैमत्यम्, अपि तु व्यक्तिशक्तिज्ञानत्वेन हेतुतायामेव। अत एव व्यक्त्यंशे कुब्जा शक्तिरिति गीयते। तदंशे तज्ज्ञानानपेक्षणात्। अत एव व्यक्तेर्न वाच्यता। न हि शक्तिधीविषयतामात्रेण वाच्यता, तादृशविषयताया अन्वयसाधारण्यात्। अपि तु यद्विषयकत्वेन शक्तिज्ञानस्य तद्विषयकशाब्दधीजनकत्वं तत्त्वमेव वाच्यताव्यवहारनियामकम्। अन्वयांशे कुब्जशक्तिसत्त्वेऽपि यथा तद्विषयकत्वं शक्तिज्ञानजनकतायां नावच्छेदकम्, तथा व्यक्त्यंशे तत्सत्त्वेऽपि तद्विषयकत्वस्य शक्तिज्ञानजनकतायामनवच्छेदकत्वान्न व्यक्तौ तद्व्यवहारः। तद्विषयकत्वस्य शाब्दधीविशेषणत्वात् गवादिपदशक्तिज्ञानस्य गोत्वादिज्ञान-विषयकत्वेन गोत्वादिशाब्दधीहेतुत्वेऽपि न गवादिपदस्य गोत्वादिज्ञानवाचकत्वापत्तिः।

**वस्तुतो** यद्विषयकत्वविशिष्टज्ञानविषयकत्वेन शक्तिज्ञानस्य शाब्दधीजनकता, यद्विषय-कत्वेन वा शाब्दधियः शक्तिज्ञानजन्यता तत्त्वमेव तथा।

**एतेन** ज्ञानत्वज्ञानस्यापि ज्ञानपदवाच्यतापत्तिः। शक्यज्ञानविषयत्वेनैव ज्ञानपदशक्ति-ज्ञानस्य ज्ञानत्वेन ज्ञानत्वज्ञानविषयकशाब्दधीजनकत्वादिति **परास्तम्।**

कारणत्वस्य कार्यत्वस्यावच्छेदकगर्भे गोत्वादिविषयकत्वस्य निवेशात् गोत्वादेर्वाच्यतोप-पत्तिः। एवञ्च गौर्गोपदशक्येत्याकारिकाऽपि शाब्दबोधोपयोगिशक्तिधीः सम्भवति। व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यात्यापत्तिविरहात्। तादृशज्ञानस्य शाब्दधीहेतुत्वेऽपि गोत्वधर्मितावच्छेदकक-शक्तिज्ञानत्वेन व्यक्तिविषयतामनन्तर्भाव्यैव गोत्वप्रकारकशाब्दबुद्धौ तस्य तथात्वात् उक्तरीत्या व्यक्तेरवाच्यतोपपत्तेः।

न चैवं व्यक्त्यंशे शक्तिज्ञानस्यापेक्षिततया तदंशे शक्तेः कुब्जत्वानुपपत्तिरिति वाच्यम्। कार्यकारणभावावच्छेदककोटौ व्यक्त्यनन्तर्भावस्यैव तदंशे कुब्जताव्यवहारनिर्वाहकत्वात्। अत एव सामान्यलक्षणापूर्वपक्षे **मणिकृतां** समानप्रकारकत्वेन शक्तिज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावाभि-धानमपि न विरुध्यते।

न च शक्त्यंशे गोत्वादिप्रकारकज्ञानस्य गवांशे गोत्वप्रकारकशाब्दबोधहेतुत्वेऽपि कार्यकारणयो: समानप्रकारकत्वस्याक्षतत्वान्नानुभवविरोध इति वाच्यम्। शक्त्यंशे गोत्वादि-प्रकारतामादाय समानप्रकारकत्वस्याभिप्रेतत्वे "**अपूर्वे वक्ष्यत**" इत्यस्यासङ्गत्यापत्ते:। अपूर्ववादे समानप्रकारकात् लिङ्पदस्य कार्यत्वेन घटादिरूपकार्ये शक्तिज्ञानात् कार्यत्वेनापूर्वविषयक-शाब्दबोध इत्येवाभिधानात् शक्त्यंशे शाब्दधीप्रकारकज्ञानस्य हेतुतायास्तत्रानुक्ते:।

न चैवं जात्यंशे सा ज्ञाता, व्यक्त्यंशे च स्वरूपसती हेतुर्लाघवादिति कुब्जशक्तिवाद इत्यादिचिन्तामणिग्रन्थविरोध इति वाच्यम्। मतभेदेनोभयसङ्गते:।

वस्तुतस्तु - जातिधर्मितावच्छेदककशक्तिज्ञानस्य हेतुत्वे व्यक्तेर्विषयतापि कारणता-वच्छेदककोटौ निविशते। विशेष्यतावच्छेदकत्वेनैव धर्मितावच्छेदकीयविषयताविशेषस्य विशेषणीयत्वात्। अवच्छेदकतानिरूपकविशेष्यताया व्यक्तिविषयतारूपत्वात्।

एवञ्च व्यक्तेरवाच्यताव्यवहारस्य कथञ्चिदुपपादनेऽपि शक्त्यंशे जातिप्रकारकज्ञानहेतुता-मतापेक्षया गौरवं दुर्वारमेव, कारणतावच्छेदकेऽधिकविषयतानिवेशात्।

एवं द्रव्यत्वादिधर्मितावच्छेदककप्रमात्मकगवादिपदप्रकारकशक्तिज्ञानात् द्रव्यत्वादिप्रकारक-शाब्दबोधवारणाय शक्त्यंशे धर्मितावच्छेदकावच्छिन्नत्वावगाहित्वस्यापि अधिकस्य निवेशनीय-तया गौरवमिति व्यक्तौ कुब्जशक्तिवादिनामपिशक्त्यंशे जातिप्रकारकज्ञानहेतुतामतमेव साधीय:।

वस्तुतस्तु सर्वलाक्षणिकस्थलेऽप्यन्वबोधस्यानुभविकत्वेन दुरपह्नवतया लाक्षणिकस्याप्यनु-भावकत्वं दुर्वारमेवेति तस्य लक्ष्यार्थे कुब्जिकाशक्तिप्रसङ्ग इति नानुभवजननसामर्थ्यमीश्वर-सङ्केतो वा वृत्तिरूपा शक्ति:, अपि तु पदार्थान्तरमेव।

सा च जातावेव कल्प्यते न तु व्यक्त्यादाविति न तत्र कुब्जशक्तिरपीति तत्त्वम्।

अथ व्यक्तेर्गवादिपदावाच्यत्वे गवादिपदाव्द्यक्ते: स्मरणमनुभवश्च न स्यात्।

न च पदावाच्यस्याप्यन्वयस्येव व्यक्तेर्भानं शाब्दबोधे नानुपपन्नमिति वाच्यम्। तद्धर्मप्रकारकशाब्दबोधे तद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुतया गोत्वप्रकारकशाब्दबुद्धौ

गोत्वादिप्रकारक-स्मरणस्यापेक्षणीयतया सम्बन्धग्रहाविषयतया व्यक्तेरस्मरणे व्यक्ते: शाब्दानुभवविषयताया दुरुपपादत्वात्, अन्वयस्य च संसर्गविधयैव भानात्, शाब्दधियोऽन्वयांशे निष्प्रकारकतया तदुपस्थित्यनपेक्षणेन वाच्यत्वानुपयोगादिति चेत्,

**अत्र भट्टा:** - पदान्न व्यक्ते: स्मरणमनुभवो वा किन्त्वाक्षेपादेव व्यक्तिधी:। आक्षेपिका च जातिरेव। आक्षेपश्चानुमानमर्थापत्तिर्वा।

न च जातिव्यक्त्योर्वैयधिकरण्यादाक्षेपासम्भव:, तादात्म्यसम्बन्धेन जातेराधेयतासम्बन्धेन व्यक्त्याक्षेपकतायामविरोधात्।

वस्तुतस्तु गामानयेत्यादौ स्वाश्रयवृत्तित्वादिरूपपरम्परासम्बन्धेनानयनकर्मत्वादौ गोत्वादि-जातेरन्वय: शाब्द:। तेन सम्बन्धेन गोत्वादिमत्त्वस्य चाधेयतासम्बन्धेन गवादिमत्त्वविरहेऽनुप-पद्यमानत्वाच्चानयनकर्मत्वादावाधेयतासम्बन्धेन गवादिव्यक्तिप्रकारिका धी:। आक्षेपात् पूर्वं संसर्गघटकतया शाब्दबोधे व्यक्तिभानेऽपि कर्मत्वांशे गोत्वाद्यवच्छिन्नव्यक्ते: प्रकारतया

भानानुरोधेनाक्षेपादर:। गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगितानवच्छेदकधर्मत्वात्, किञ्चिदाश्रितं वा जातित्वादित्यनुमानतो व्यक्तिलाभस्तु न सार्वत्रिक:। तादृशहेतूपस्थितेरसार्वत्रिकत्वात्, गवादिपदात्तादृशरूपेण गोत्वादेरनुपस्थिते:।

अथ गवादिपदात् व्यक्तेरस्मरणे गोत्वादिस्मरणमेव कथमुपपद्यते। गोत्वप्रकारकस्मरणे व्यक्तेर्विशेष्यतया भाननियमात्। तद्विशेष्यकस्मरणे च व्यक्तिघटितगोत्वत्वादे: प्रकारतया भाननियमात्। व्यक्त्यघटितप्रकारस्य सम्भवेऽपि स्वरूपत एव जाते: शक्यतया धर्मान्तरविशेष्यतया तत्स्मरणासम्भवात्। धर्मान्तरप्रकारेण स्मरणे गोत्वाद्यंशे निष्प्रकारकशाब्दज्ञानासम्भवेन तादृशस्मृतेरनुपयोगित्वाच्चेति चेत्,

न-पदादालोचनरूपस्यैव स्मरणस्योपगमात्, किञ्चिद्धर्मावच्छिन्नसम्बन्ध्युपरक्तसम्बन्ध-ज्ञानाधीनतत्सम्बन्धिस्मृते: सप्रकारकत्वनियमेऽपि निर्विशेषणकसम्बन्ध्युपरक्तसम्बन्धज्ञानान्नि-

र्विकल्पकांशस्मरणे बाधकाभावात्। निर्विकल्पकस्य संस्काराजनकत्वेऽपि विशिष्टज्ञानाहितविशिष्ट-गोचरसंस्काराद्विशेष्यांशानुद्बोधदशायां केवलविशेषणांशस्मरणे न विरोध इति **वदन्ति।**

**तदसत्** - गवादिपदात् स्वरूपतो गोत्वादिज्ञानेऽपि व्याप्यताऽवच्छेदकप्रकारेण तद्ग्रहा-सम्भवात्, ततो व्यक्त्याक्षेपासम्भवात्।

न च परम्परासम्बन्धेन शाब्दधीविषयेण गोत्वादिविशेषितकर्मत्वादिहेतुनाऽऽनयनादौ गवादिकर्मत्वमनुमेयमिति वाच्यम्। विशिष्टसाध्यस्य प्रागप्रतीतेः।

एवं गौरानीयतामित्यादौ स्वरूपत उपस्थितस्य गोत्वादेरेव विशेष्यतया भानोपगमे निधर्मितावच्छेदककशाब्दधीस्वीकारापत्तेः।

एवं गवादावानयनकर्मत्वं सामानाधिकरण्यसम्बन्धेनानयनकर्मत्वाविशेषितगोत्वादिना हेतुनाऽनुमेयम्। तच्च न सम्भवति, तादृशगोत्वादेरानयनकर्मत्वादिशून्यगवादिसाधारण्येन व्यभिचारात्। सामानाधिकरण्यसम्बन्धेनानयनकर्मत्वादिविशिष्टस्य विशेषणाव्यभिचारित्वेऽपि साध्यस्य पक्षे सन्देहदशायां साध्यहेत्वोः पक्षे दुर्निश्चयत्वात्। अतो व्यक्तेः शाब्दबोधे विशेष्यविधया भानमावश्यकमित्यपि बोध्यम्।

**एतेन** जातिवाचकपदाज्जातिबोधः शाब्दः व्यक्तिबोधस्त्वौपादानिक एवेति **श्रीकरमतमनुपादेयम्।**

उपादानस्यार्थापत्तिरूपत्वेन **भट्टमताविशेषात्।**

न च जातिरेव व्यक्तिबोधिका, जातिकरणत्वमेवौपादानिकत्वं बोधस्येति वाच्यम्।

जातेः प्रमाणान्तरत्वकल्पनापेक्षया व्यक्तिशक्तिकल्पनाया एवोचितत्वात्।

एवं जातेर्नित्यतया सर्वदैव तदुपादानकव्यक्तिधीवारणाय जातिहेतुकव्यक्तिबोधे जातिशक्तिज्ञानघटिततच्छाब्दसामग्र्याः सहकारित्वमवश्यमभ्युपगन्तव्यमिति। तथा च तादृश-सामग्र्या एव व्यक्तिज्ञानप्रयोजकतासम्भवेन जातेः करणत्वकल्पनमनर्थकम्।

न च जातिनिरपेक्षजातिभासकशाब्दसामग्र्या व्यक्तिज्ञानप्रयोजकत्वे व्यक्त्यंशेऽपि शाब्दत्वमावश्यकम्। तथा सति च वृत्तिज्ञानजन्यव्यक्तिस्मृतेरप्यपेक्षा स्यात्। जातेः करणत्वे च

व्यक्त्यंशे औपादानिकत्वमेव, न तु शाब्दत्वमिति न तदपेक्षेति वाच्यम्। व्यक्तिज्ञानांशे जातेः करणत्वे तदंशेऽशाब्दत्वोपगमसम्भवेन तदकरणत्वेऽपि तत्सम्भवात्।

जातेरकरणत्वे व्यक्त्यंशे कीदृशकारणस्य जन्यतावच्छेकधर्मवत्त्वमिति चेत्, न कस्यापि। तावता क्षतिविरहात्।

व्यक्तेरपि बोधः शब्दादेव न त्वाक्षेपादितः। व्यक्तिशाब्दबोधे शक्तिविरहो नानुपपत्तिं प्रयोजयति, लक्षणात एव तदुपपत्तेरिति **मण्डनाचार्यमतम्।** तदुक्तम् -

**"जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।**

**नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे"।।** इति।

अस्तित्वनास्तित्वे उत्पादविनाशौ। लक्षणा च जातिप्रकारेणैव बोधयति, न तु व्यक्तित्वादिनेति नानुभवविरोधः। नीलादिपदस्य शक्यनीलादिगुणपुरस्कारेण लक्षणया बोधकत्ववत् शक्यजातिपुरस्कारेण लक्षणया गवादिपदस्य व्यक्तिबोधकत्वेऽविरोधात्। **"स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा"** इत्यत्र स्वार्थपदस्य शक्यतावच्छेदकपरत्वात्।

**अत्रेदं चिन्त्यम्** - गवादिपदाल्लक्षणया गोत्वादिप्रकारकबोधोपगमे जातिशक्तिरन्वयबोधे नापेक्ष्यते, लक्ष्यतावच्छेदकताया एव जातिभानप्रयोजकत्वसम्भवात्।

न च शक्तिं विना व्यक्तौ शक्यसम्बन्धरूपलक्षणैव न निर्वहतीति शक्तेरुपयोगितेति वाच्यम्। लक्षणानिर्वाहार्थं शक्तिकल्पने गवादिपदस्य द्रव्यत्वादावपि विनिगमनाविरहेण शक्तिकल्पनप्रसङ्गात्। द्रव्यत्वादिसम्बन्धेनापि गवादौ लक्षणासम्भवात्। प्रयोगविरहस्य द्रव्यत्वादाविव स्वातन्त्र्येण गोत्वादावप्यविशिष्टत्वात्। लक्षणाघटकतया शक्तेरुपयोगितायां तस्या वृत्तित्वानुपपत्तेः, स्वातन्त्र्येणातथात्वात्।

अथाकृतिविशिष्टायामेव व्यक्तौ लक्षणा। आकृतिप्रकारेण व्यक्तिबोधस्य नैयायिकानामप्यनुमतत्वात्। तत्र शक्त्युपस्थापितजातेरन्वय उपगम्यते।

न चाकृतावेव शक्ति: जातिविशिष्टे लक्षणेति वैपरीत्यमेव किन्न स्यादिति वाच्यम्। आकृतेरवयवसंयोगरूपाया आनन्त्यात् तदपेक्षया लघीयस्यां जातावेव शक्तिकल्पनौचित्यात्।

न चावयवसंयोगनिष्ठजातिरेव शक्याऽस्तु, व्यक्तौ तदन्वयश्च स्वाश्रयघटितपरम्परा-सम्बन्धेन स्वीक्रियतामिति वाच्यम्।

आकृतिप्रकारकबोधस्यानुभविकत्वात्। लक्ष्यार्थव्यक्त्यनुपरक्तायां केवलजातौ प्रयोगविरहश्च न शक्त्यभावसाधक:, अप्रयोजकत्वात्।

तत्राप्रयोगमात्रस्यैव तदशक्यत्वबीजत्वात्। जातावप्रयोगस्यासिद्धत्वात्। तात्पर्यसत्त्वे च वृत्तिद्वयाधीनबोधोपगमे क्षतिविरह:।

न चैवं केवलं मुख्यार्थतात्पर्येण गवि नित्यत्वमिति स्वारसिकप्रयोगापत्तिरिति वाच्यम्। शक्त्या स्वरूपत उपस्थिताया जाते: समानपदोपात्तधर्मिण्येवाश्रयतासम्बन्धेनान्वयस्य व्युत्पन्नत्वात्।

न चान्वयितावच्छेदकरूपेणानुपस्थिताया जातेरन्वयो विरुद्ध्यते, व्युत्पत्तिवैचित्र्येण प्रकारतया स्वरूपत उपस्थिताया जातेरन्वयस्वीकारे क्षतिविरहादिति रीत्या चेत् मतमेतत् परिष्क्रियते।

तथापि स्वरूपतो गोत्वान्वयबोधस्यापि लक्ष्यार्थे गवादौ स्वीकारे तादृशान्वयबोधं प्रति योग्यताज्ञानादीनां कारणताकल्पनाऽऽधिक्यात्, गोत्वादिविशिष्टव्यक्तिशाब्दसामग्रीप्रतिबन्धकतायां जातिव्यक्तिविषयकोपस्थितिद्वयस्य निवेशनीयतया प्रतिबन्धकतावच्छेदकशरीरगौरवाच्च जात्याकृतिविशिष्टव्यक्तिशक्तिपक्ष एव साधीयान्।

**प्राभाकरास्तु** - जातिशक्तिज्ञानादेव जातिप्रकारेण व्यक्ते: स्मरणं शाब्दबोधश्च। न तु निर्विकल्पकरूपं जातिस्मरणम्, निर्विकल्पकानभ्युपगमात्।

व्यक्तिसम्बन्धज्ञानविरहेण तदंशानुद्बोधाद्व्यक्तिस्मरणासम्भव इति तु नाशङ्कनीयम्, व्यक्तिमविषयीकृत्य स्वरूपतो गोत्वादिज्ञानासम्भवेन गोत्वाद्युद्बोधकस्यैव व्यक्त्युद्बोधकत्वात्, उद्बोधकस्य फलबलकल्प्यत्वात्।

सम्बन्धितावच्छेदकहस्तित्वादौ सम्बन्धाग्रहेऽपि हस्त्यादिसम्बन्धिहस्तिपकादि-ज्ञानात्मकोद्बोधकबलात् हस्त्यादिस्मरणे हस्तित्वादिप्रकारतया भानवत् व्यक्तिसम्बन्धज्ञान-मन्तरेणापि जातिसम्बन्धिपदज्ञानात् जातिस्मरणे व्यक्तेर्विशेष्यतया भाने विरोधविरहात्। तद्धर्मप्रकारकस्मृतौ तद्धर्मावच्छिन्नसम्बन्धितया गृहीतवस्तुज्ञानस्य हेतुतायामदृष्टादिरूपोद्बोधक-जनितस्मृतौ व्यभिचारवारणाय कार्यतावच्छेदकसङ्कोचस्यावश्यकतया तत एव प्रकृते व्यभिचारानवकाशात्।

जातिशक्तिज्ञाने नियमतो जातिप्रकारेण व्यक्त्यभानात् तज्जन्यसंस्कारान्नियमतो व्यक्तिस्मरणासम्भव इति चेत्।

का क्षतिः, व्यक्तिविषयकज्ञानान्तरस्यावश्यकतया तज्जनितसंस्कारादेव व्यक्तिस्मरण-सम्भवात्।

अथ भवतु जातिशक्तपदज्ञानाज्जातिप्रकारेण व्यक्तिस्मरणम्। तथाऽपि तत्प्रकारकशाब्द-बोधो न सम्भवति, तद्धर्मप्रकारकधर्मिविषयकशाब्दबोधे तद्धर्मप्रकारेण धर्मिगृहीतवृत्तिकपदज्ञान-जन्यतद्धर्मप्रकारकोपस्थितेर्हेतुत्वात्। पदे गृहीतवृत्तिकत्वमात्रनिवेशे घटत्वादिगृहितवृत्तिकपदात् गोत्वाद्यवच्छिन्ननिरूपितसम्बन्धान्तरावगाहिज्ञानजन्यगोत्वादिप्रकारकस्मरणात् गोत्वादिप्रकारक-शाब्दबोधापत्तेः। तद्धर्मगृहीतवृत्तिकत्वनिवेशे पशुत्वादिधर्मगृहीतशक्तिकविशिष्टवाचकपश्वादिपदात् पशुत्वादिविशिष्टविषयकशाब्दबोधस्य गुरूणामप्यननुमतस्यापत्तेः।

न च प्रकारीभूतधर्मभेदेन कार्यकारणभावभेदस्य यत्त्वतत्त्वाननुगमेनावश्यकत्वाज्जाति-विशिष्टविषयकशाब्दबोधे एव जातिरूपधर्ममात्रगृहीतवृत्तिकपदज्ञानजन्यस्मरणस्य हेतुत्वमङ्गी-कार्यम्। उपाधिविशिष्टविषयकशाब्दबोधे तु विशिष्टगृहीतवृत्तिकपदज्ञानजन्यस्मृतेरेवेति वाच्यम्।

एवमपि जातिमल्लाक्षणिकपदज्ञानाज्जातिप्रकारकशाब्दबोधानुपपत्तेर्दुर्वारत्वात्। लक्षणाज्ञाना-धीनपदार्थोपस्थितेर्हेतुत्वान्तरकल्पने च गौरवात्।

न च तन्मतेऽध्याहृतार्थस्याप्यन्वयबोधविषयतया पदजन्यपदार्थोपस्थितित्वेन हेतुतैव नास्ति, कथमुक्तानुपपत्त्यवकाश इति वाच्यम्।

सर्वार्थाध्याहारस्थलेऽन्वयबोधवारणाय तन्मतेऽपि तादृशहेतुताया व्यवस्थापितत्वात्।

नच तथापि पदज्ञानजन्यपदार्थोपस्थितित्वघटितकारणतावच्छेदकेन व्यक्तिलाक्षणिकपद-जन्यव्यक्त्युपस्थितेरसङ्ग्रहो न दोषाय, अध्याहाररूपार्थोपस्थितेर्येन रूपेण हेतुता व्यवस्थापिता लक्षणार्थोपस्थितेरपि तद्रूपाक्रान्ततयोपपत्तेः। शक्तपदस्यैवानु-भावकतेति सिद्धान्तात्। सर्वलाक्षणिकस्थलेऽन्वयबोधानुपगमात् तत्स्थलीयसामग्रीबलात् सर्वार्थाध्याहारस्थलेऽप्यन्वयबोधा-पत्तिरिति शङ्कानवकाशादिति वाच्यम्।

यत्र लाक्षणिकपश्वादिपदात् गोत्वादिप्रकारकोपस्थितिः तदव्यवहितोत्तरद्वितीयादि-विभक्तितः शक्त्या कर्मत्वाद्युपस्थितिः ततः कर्मत्वादिविशेष्यको गोत्वाद्यवच्छिन्नप्रकारकः शाब्दबोधः तत्स्थलीयसामग्री लक्षणाधीनपदार्थोपस्थितेरध्याहारात्मकोपस्थितिसाधारणरूपमात्रेण हेतुतामते कर्मत्वाद्युपस्थापकविभक्तिप्रकृतिभूतपश्वादिपदाद्यत्र न गोत्वाद्यवच्छिन्नोपस्थितिः, अपि तु निराकाङ्क्षपदान्तरादनुमानादितो वा, तत्राप्यक्षतैवेति तादृशशाब्दबोधस्य तत्रापत्तेर्दुर्वार-त्वात्।

अर्थाध्याहारमतेऽपि यत्र साकाङ्क्षपदद्वयान्न प्रकृतवाक्यार्थघटकस्याप्यर्थद्वयस्योपस्थितिः तत्र शाब्दबोधापत्तेरनिष्टत्वादिति चेत्,

न, शक्तिलक्षणासाधारणस्यानतिप्रसक्तवृत्तित्वस्य दुर्वचतया शक्तित्वशक्यसम्बन्धत्वा-भ्यामेव तयोर्निवेशनीयतया शक्तिलक्षणाधीनपदार्थोपस्थित्योः कारणताभेदस्य व्यक्तिशक्तिवादिना-मप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेस्तद्धर्मगृहीतशक्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थिति-त्वेनैव तद्धर्मप्रकारकशाब्दबोधहेतुतायाः कल्पयितुमुचितत्वात्।

नच तद्धर्मावच्छिन्नविषयतानिरूपितशक्तिविषयतानिरूपितविषयताशलिज्ञानत्वेन व्यक्तौ शक्तिलक्षणाग्रहाय व्यक्तिशक्तिवादिमतेऽनुगम: सम्भवति। गोसम्बन्धिशक्तं पदमित्याकारके पदशक्यसम्बन्धिनी गौरित्याकारके वा लक्षणाग्रहेऽपि गोत्वाद्यवच्छिन्नविषयताया निरूप्यनिरूपक-भावसत्त्वादिति वाच्यम्।

साक्षान्निरूपितत्वपरम्परानिरूपितत्वयोरनुगमकरूपाभावात्।

**यत्तु** वृत्तिसंसर्गकपदप्रकारकज्ञानमेव शाब्दबोधोपयोगि। एवञ्च शक्तिसंसर्गतानिरूपकपद-प्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्मावच्छिन्नविशेष्यकशक्तिलक्षणा-ज्ञानयोरनुगम: सम्भवत्येव। शक्यसम्बन्धेनार्थांशे पदप्रकारकग्रहस्यापि तथात्वात्, संसर्गतावच्छेद-कीयविषयतायामपि संसर्गतात्वसत्त्वादिति ।

**तदसत्** - शक्तिकालीनत्वादिसम्बन्धावगाहिज्ञानवारणाय पदप्रकारत्वार्थविशेष्यत्वोभय-निरूपितशक्तिनिष्ठसांसर्गिकविषयताया निवेशस्यावश्यकतया शक्तिसंसर्गज्ञानसङ्ग्राहकेण रूपेण लक्षणाग्रहासम्भवात्।

अथ धर्मशक्तपदस्य धर्मिस्मरणशाब्दबोधजनकत्वे लोमाद्यात्मकोपाध्यवच्छिन्नबोधक-पश्वादिपदस्यापि धर्मिशक्तिर्विलीयताम्, युक्ते: साम्यात्।

न च निर्विकल्पकरूपस्य स्मरणस्य शाब्दबोधस्य चानभ्युपगमाज्जातिवाचकपदात् व्यक्त्यविषयकस्मरणाद्यसम्भवेन तस्य व्यक्तिस्मरणादिजनकत्वम्। धर्म्यविषयकस्यापि लोमत्वाद्यवच्छिन्नविषयकस्मरणादे: सम्भवात् पश्वादिपदस्य लोमत्वाद्यवच्छिन्नमात्रवाचक-त्वोपगमे न धर्मिधी: सम्भवतीति न तस्य धर्म्यवाचकतेति वाच्यम्।

उपाधेधर्मिविनिर्मोकेण भानसम्भवरूपस्य जात्यपेक्षया विशेषस्य सत्त्वेऽपि जातिशक्तपद-ज्ञानस्य जातिप्रकारिकायामिवोपाधिशक्तिज्ञानस्याप्युपाधिप्रकारकधर्मिविषयकबुद्धौ कारणताकल्पने बाधकाभावादुपाधिमात्रशक्तादपि धर्मिग्रहसम्भवादिति चेत्,

न-लोमत्वाद्यवच्छिन्नसम्बन्धान्तरवत्तया गृहीतात् पश्वादिपदाल्लोमत्वादिना लोमादि-मुख्यविशेष्यकस्यैव स्मरणस्य बाधकान्तरविरहदशायामुत्पादवत् तत्तद्रूपावच्छिन्नशक्तत्वेन

गृहीतात् पदादपि तत्तद्रूपावच्छिन्नमुख्यविशेष्यकस्मरणोत्पादस्यानुभविकत्वात्, ततस्तद्धर्मावच्छिन्नप्रकारकस्मरणस्य नियमतः स्वीकारासम्भवात्। लोमादिमात्रशक्तत्वेन गृहीतपदान्नियमतस्तत्प्रकारकशाब्दबोधस्यानिर्वाहात्, अविशेषितगोत्वादेः सम्बन्धान्तरज्ञानादपि तत्प्रकारकधर्मिस्मरणस्यैवोपगमादेतादृशशक्तिसम्बन्धज्ञानान्नियमतस्तत्प्रकारकधर्मिस्मरणोपगमेऽनुभवविरोधविरहात्।

अथ गवादिपदस्य समवायेन गोत्वादिविशिष्टावाचकत्वोपगमे तज्जन्यबोधे गोत्वादेः समवाय एव संसर्गतया भासते, न तु सम्बन्धान्तरमित्यत्र किं नियामकम्। वाच्यानन्तर्भावस्य समवायसाधारण्येन सम्बन्धान्तराभानप्रयोजकत्वासम्भवात्। न हि जातिः व्यक्तिं विना न भासत इतिवत् समवायं विनापि न भासत इत्यपि नियमो, येन जातिशक्तिज्ञानजन्यबोधे समवायभानस्याप्यावश्यकता न तु सम्बन्धान्तरभानस्येति स्यात्। तदादिपदात् समवायमविषयीकृत्यापि सम्बन्धान्तरेण गोत्वादिविषयकबोधोदयादिति चेत्,

एवं सति ज्ञानशक्तिरेवादरणीया। तथा च गवादिपदस्य समवायेन गोत्वादिप्रकारकज्ञान एव शक्तेरुपगमात् ततो नाभ्रान्तानां सम्बन्धान्तरेण तत्प्रकारकधीः, तत्सम्बन्धेन तत्प्रकारकशक्तिग्रहस्यैव तादृशबोधहेतुत्वादिति।।

**इति श्रीमहामहोपाध्यायगदाधरभट्टाचार्यविरचितः शक्तिवादः समाप्तः ।।**